कर्नाटकप्रशासनम्

# संस्कृतरश्मिः - ३

## तृतीयभाषा - संस्कृतम्

## अष्टमी कक्ष्या

(Revised)

## प्रथमः भागः

©KTBS
NOT TO BE REPUBLISHED

# 8

# SAMSKRITHA RASHMI-3

## EIGHTH STANDARD

## THIRD LANGUAGE - SANSKRIT

## PART-1

**KARNATAKA TEXTBOOK SOCIETY (R)**
**6th Cross, Malleshwaram,**
**Bengaluru- 560 003.**

# पाठ्यपुस्तकरचनासमितिः

**अध्यक्षः**

**डा. एम्.के.श्रीधरः,** कुलसचिवः, कर्नाटकसंस्कृतविश्वविद्यालयः, चामराजपेटे, बेङ्गलूरु

**सदस्याः**

**डा. एन्. एस्. सुरेशः,** संस्कृतोपन्यासकः, सिन्धिमहाविद्यालयः, बेङ्गलूरु ।

**विद्वान् जि. एम्. गुरुमूर्तिः,** संस्कृताध्यापकः,पदविपूर्वविद्यालयः, मल्लाडिहल्लि, चित्रदुर्गः।

**श्रीमती यशोदा,** संस्कृताध्यापिका, स.बा.प.पू. विद्यालयः, चन्नपत्तनम्, रामनगरम् ।

**श्रीमती मूकाम्बिका हेगडे,** संस्कृताध्यापिका, स.प.पू. विद्यालयः, मागडि, रामनगरम् ।

**श्रीमान् सतीशः पि. बिरादार्,** चित्रकलाशिक्षकः, बि.ई.एल् प्रौढशाला, जालहल्लि, बेङ्गलूरु ।

**परिशीलकः**

**विद्वान् एम्. शङ्करभट्टः,** निवृत्तः संस्कृताध्यापकः, कुमार पार्क प्रौढशाला, बेङ्गलूरु ।

**सम्पादकः**

**डा. कोटेमने रामचन्द्रभट्टः,** निर्देशकः, वेदविज्ञानशोधसंस्थानम्, बेङ्गलूरु ।

**प्रमुखसंयोजकः**

**प्रो. जि. एस्. मुडम्बडित्ताय,** क.प.पु.सङ्घः, बेङ्गलूरु ।

**मार्गदर्शकौ**

**श्री नागेंद्रकुमारः,** व्यवस्थापकनिर्देशकः, क.प.पु.सङ्घः, (रि) बेङ्गलूरु ।

**श्रीमती सि. नागमणी,** उपनिर्देशका, क.प.पु.सङ्घः, (रि) बेङ्गलूरु ।

**संयोजिका**

**श्रीमती एस्. एन्. लीलावती,** ज्येष्ठ सहायकनिर्देशिका, क.प.पु.सङ्घः, (रि) बेङ्गलूरु ।

@KTBS NOT TO BE REPUBLISHED

# PREFACE

The Textbook Society, Karnataka has been engaged in producing new textbooks according to the new syllabi prepared which in turn are designed based on NCF – 2005 since June 2010. Textbooks are prepared in 11 languages; seven of them serve as the media of instruction. From standard 1 to 4 there is the EVS and 5th to 10th there are three core subjects namely mathematics, science and social science.

NCF – 2005 has a number of special features and they are:

- Connecting knowledge to life activities
- Learning to shift from rote methods
- Enriching the curriculum beyond textbooks
- Learning experiences for the construction of knowledge
- Making examinations flexible and integrating them with classroom experiences
- Caring concerns within the democratic policy of the country
- Make education relevant to the present and future needs.
- Softening the subject boundaries integrated knowledge and the joy of learning.
- The child is the constructor of knowledge

The new books are produced based on three fundamental approaches namely, Constructive approach, Spiral approach and Integrated approach.

The learner is encouraged to think, engage in activities, masters skills and competencies. The materials presented in these books are integrated with values. The new books are not examination oriented in their nature. On the other hand they help the learner in the total development of his/her personality, thus help him/her become a healthy member of a healthy society and a productive citizen of this great country India.

Language textbooks are designed to help learners master communicative competencies, excellent comprehension, meaningful expression and efficient reference skills.

Schools in Karnataka offer seven languages as media of instruction and eight as first languages and ten languages are offered as third language. The objective is to help the learners to use these languages efficiently at the communicative level. It is hoped that at least a cross section of learners achieve competencies to use these languages at the creative level.

Teachers are expected to adapt their teaching methods not to make these textbooks just feed materials for examinations, but help learners master language competencies such as communication, comprehension, expression in writing and necessary reference skills.

The Textbook Society expresses grateful thanks to the chairpersons, writers, scrutinisers, artists, staff of DIETs and CTEs and the members of the Editorial Board and printers in helping the Text Book Society in producing these textbooks.

**Prof.G. S. Mudambadithaya**
Co-ordinator
Curriculum Revision
and Textbook Preparation
Karnataka Textbook Society
Bengaluru.

**Nagendra Kumar**
Managing Director
Karnataka Textbook Society
Bengaluru.

© KTBS NOT TO BE REPUBLISHED

# प्राक्कथनम्

संस्कृतभाषा अत्यन्तं सुन्दरभाषा ललिता भाषा मधुरा भाषा इति च प्रसिद्धा अस्ति। विशभाषासु संस्कृतम् एव प्राचीन भाषा। भाषायाः कौशलं श्रवणभाषणपठनलेखनद्वारा भविष्यति इति भाषाविज्ञानिनः वदन्ति। अत एव शब्दरूपाणां क्रियापदरूपाणां सुभाषितानां च कण्ठपाठार्थ् अत्र अवकाशः दत्तः। शिक्षकाः कक्ष्यासु विद्यार्थिभिः मौखिकाभ्यासं कारयेयुः इति अस्माकम् अपेक्षा वर्तते।

2005 राष्ट्रियपाठ्यक्रमनियमानुसारं (NCF - 2005) पठ्यपुस्तकमिदं विरचितम् अस्ति। अत : शिक्षकाः भाषायाः चतुरः अंशान् परिगणय्य छात्रान् बोधयन्तु इति आशास्महे।

पुस्तकरचनायां कृतसाहाय्येभ्यः कर्नाटकपठ्यपुस्तकसङ्घस्य अधिकारिभ्यः मुद्रणचित्रलेखनादिकार्येषु प्रत्यक्षपरोक्षरुपेण कृतभूरिपरिश्रमेभ्यः

धन्यवादाः।

**बेङ्गलूरु**

**डा. एम्.के. श्रीधरः**
**अध्यक्षः**
**पठ्यपुस्तकरचनासमितिः**

@KTBS NOT TO BE REPUBLISHED

**अध्यापकेभ्यः सूचना**

1. अवधेयांशः क्रियाकलापः इति विभागतः परीक्षायां प्रश्नाः न भवेयुः।
2. कृपया आकरग्रन्थानां परिशीलनं कुर्युः ।
3. गद्यपाठान्तर्गताः कण्ठपाठार्थं निर्दिष्टाश्च श्लोकाः तात्पर्यलेखनार्थं प्रश्नरूपेण न भवेयुः।
4. पूरकपाठेभ्यः दीर्घोत्तरप्रश्नाः एव परीक्षायां भवेयुः।
5. पाठयपुस्तकस्यादौ दत्तं स्तोत्रं छात्राणां गानार्थेव न तु परीक्षार्थ् ।

# About the Revision of Textbooks

Honourable Chief Minister Sri Siddaramaiah who is also the Finance Minister of Karnataka, in his response to the public opinion about the New Textbooks from standard one to ten, announced, in his 2014-15 budget speech of constituting an expert-committee, to look into the matter. He also spoke of the basic expectations there in, which the Textbook experts should follow: “ The Textbooks should aim at inculcating social equality, moral values, development of personality, scientific temper, critical acumen, secularism and the sense of national commitment”, he said.

Later, for the production of the Textbooks from class one to tenth, the Department of Education constituted twenty seven committees and passed an order on 24-11-2014. The committees so constituted were subject and class-wise and were in accordance with the standards prescribed. Teachers who are experts in matters of subjects and syllabi were in the committees.

There were already many complaints, and analyses about the Textbooks. So, a freehand was given in the order dated 24-11-2014 to the responsible committees to examine and review text and even to prepare new text and review if necessary. Afterwards, a new order was passed on 19-9-2015 which also give freedom even to re-write the Textbooks if necessary. In the same order, it was said that the completely reviewed Textbooks could be put to force from 2017-18 instead of 2016-17.

Many self inspired individuals and institutions, listing out the wrong information and mistakes there in the text, had send them to the Education Minister and to the ‘ Textbook Society’. They were rectified. Before rectification we had exchanged ideas by arranging debates. Discussions had taken place with Primary and Secondary Education ‘ Teacher Associations’. Questionnaires were administered among teachers to pool up opinions. Separate meeting were held with teachers, subject inspectors and DIET Principals. Analytical opinions had been collected. To the subject experts of science, social science, mathematics and languages, textbooks were sent in advance and later meeting were held for discussions. Women associations and science related organistation were also invited for discussions. Thus, on the basis of all inputs received from various sources, the textbooks have been reviewed where ever necessary.

Another very important thing has to be shared here. We constituted three expert committees. They were constituted to make suggestions after making a critical study of the text of science, mathematics and social science subjects of central schools (N.C.E.R.T), along with state textbooks. Thus, the state text books have been enriched basing on the critical analysis and suggestions made by the experts. The state textbooks have been guarded not to go lower in standards than the textbooks of central school. Besides, these textbooks have been examined along side with the textbooks of Andhra, Kerala, Tamil Nadu and Maharashtra states.

Another clarification has to be given here. Whatever we have done in the committees is only review, it is not the total preparation of the textbooks. Therefore, the structure of already prepared textbooks have in no way been affected or distorted. They have only been reviewed in the background of gender equality, regional representation, national integrity, equality and social harmony. While doing so, the curriculum frames of both central and state have not been transgressed. Besides, the aspirations of the constitution are incorporated carefully. Further, the reviews of the committees were once given to higher expert committees for examination and their opinions have been effected into the textbooks.

Finally, we express our grateful thanks to those who strived in all those 27 committees with complete dedication and also to those who served in higher committees. At the same time, we thank all the supervising officers of the ‘Textbook Society’ who sincerely worked hard in forming the committees and managed to see the task reach it’s logical completion. We thank all the members of the staff who co-operated in this venture. Our thanks are also due to the subject experts and to the associations who gave valuable suggestions.

**Sri M. P. Madegowda**
Mangaging Director
Karnataka Textbook Society
Bengaluru.

**Prof. Baraguru Ramachandrappa**
Chairman-in-Chief
State Textbook Revision Committee
Bengaluru.

© KTBS NOT TO BE REPUBLISHED

## परिष्करणसमितिः

१. **प्रो. बरगूरु रामचन्द्रप्प,** सर्वाध्यक्षः, राज्यपठ्यपुस्तकपरिष्करणसमितिः, बेङ्गलूरु।

२. **श्री. के.एल्. ज्ञानप्रसाद राव्,** अध्यक्षः, पठ्यपुस्तकपरिष्करणसमितिः, संस्कृतोपन्यासकः, विद्यावर्धकसङ्घः ज्यूनियर् कालेज्, राजाजिनगरम्, बेङ्गलूरु।

**सदस्याः**

१. **श्री श्रीधरभट्टः ऐनकै,** निर्देशकः, वेदान्तभारतीसंशोधनसंस्था, के.आर्. नगरम्, मैसूरु जिल्ला।

२. **डा. संतोष हानगल्,** उपनिर्देशकः, कर्नाटकसंस्कृतविश्वविद्यालयः, बेङ्गलूरु।

३. **डा. एस्. प्रभुलिङ्ग देवरु,** प्रभारी प्राध्यापकः, सर्वकारीयश्रीचामराजेन्द्रसंस्कृत कालेज्, बेङ्गलूरु।

४. **श्रीमती सुमङ्गला हेगडे,** संस्कृतशिक्षिका, सर्वकारीयबलिका प.पू.कालेज्, १३ क्रास्, मल्लेश्वरं, बेङ्गलूरु।

५. **श्री हजरत् अली. यु,** उपन्यासकः, ललितकलाविभाग. तुमकूरु विश्वविद्यालयः, तुमकूरु।

## परिष्करणोन्नतसमितिः

१. **डा.एच्.वि.वेणुगोपालः,** निवृत्तप्रांशुपालः, संस्कृतप्राध्यापकः, न्याषनल् कालेज् बसवनगुडि, बेङ्गलूरु।

२. **डा. जे.श्रीनिवासमूर्तिः,** निवृत्तप्रांशुपालः एम्.इ.एस्.कालेज्, मल्लेश्वरं, बेङ्गलूरु।

**प्रमुखमार्गदर्शकौ-**

**श्री E_8 {n8 _mXJmS6** व्यवस्थापकनिर्देशकः, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

**Kq^Uq D^8 zR8 Bel6** उपनिर्देशिका, क.प.पु. सङ्घः (रि) बेङ्गलूरु।

**संयोजिका**

**श्रीमती सुमा बि.के,** ज्येष्ठसहायकनिर्देशिका, क.प.पु.सङ्घः(रि), बेङ्गलूरु।

©KTBS NOT TO BE REPUBLISHED

# Foreword

In the pursuit of fostering a healthier and more balanced educational journey, we present this initiative aimed at reducing the weight of school bags. Education is the cornerstone of progress and it is our responsibility to ensure that the pursuit of knowledge is accompanied by the wellbeing of students.

As a first step, to reduce the burden of heavy bags, the School Education Department, Government of Karnataka has decided to print semester-wise textbooks in 2 parts i.e, Summative Assessment 1 and 2. This intervention will help significantly in reducing the weight of school bags.

This endeavour signifies a paradigm shift, acknowledging the strain posed by bulky bags on students.

@KTBS
NOT TO BE REPUBLISHED

Manjushree. N, IAS
Managing Director
Karnataka Textbook Society (R)

K1W6L6

# पाठानुक्रमणिका


| क्र.सं. | पाठः | विषयः | पृष्ठसंख्या |
|---|---|---|---|
| ०१. | प्रथमः पाठः | प्रार्थना (पद्यम्) (कण्ठपाठः करणीयः) | १ |
| ०२. | द्वितीयः पाठः | अक्षराणि | ५ |
| ०३. | तृतीयः पाठः | परिचयः - शिष्टाचारः | १४ |
| ०४. | चतुर्थः पाठः | नामपदम् | १६ |
| ०५. | पञ्चमः पाठः | ऋतुपर्वाणि | ३५ |
| ०६. | षष्ठः पाठः | संख्या | ४२ |
| ०७. | सप्तमः पाठः | गतिस्त्वं भवानि | ४९ |
| ०८. | अष्टमः पाठः | सन्धिः | ५३ |
| ०९. | नवमः पाठः | अतिथिदेवो भव | ५७ |
| १०. | दशमः पाठः | उपसर्गाः अव्ययानि च | ६३ |
| ११. | एकादशः पाठः | पत्राणि | ६८ |
| १२. | द्वादशः पाठः | अनुवादः | ७० |
| | पूरकपाठः | | |
| १३. | महर्षिः पाणिनिः | | ७२ |
| | परिशिष्टम् | | |
| १४. | पदकोशः | | ७५ |


©KTBS NOT TO BE REPUBLISHED

# मधुराष्टकम्

अधरं मधुरं वदनं मधुरं
नयनं मधुरं हसितं मधुरं ।
हृदयं मधुरं गमनं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।१।।

वचनं मधुरं चरितं मधुरं
वसनं मधुरं वलितं मधुरं।
चलितं मधुरं भ्रमितं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।२।।

वेणुर्मधुरो रेणुर्मधुरः
पाणिर्मधुरः पादौ मधुरौ।
नृत्यं मधुरं सख्यं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।३।।

गीतं मधुरं पीतं मधुरं
भुक्तं मधुरं सुप्तं मधुरं ।
रूपं मधुरं तिलकं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।४।।

करणं मधुरं चरणं मधुरं
हरणं मधुरं स्मरणं मधुरं।
वमितं मधुरं शमितं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।५।।

गुञ्जा मधुरा माला मधुरा
यमुना मधुरा वीची मधुरा ।
सलिलं मधुरं कमलं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।६।।

गोपी मधुरा लीला मधुरा
युक्तं मधुरं भुक्तं मधुरं ।
दृष्टं मधुरं शिष्टं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।७।।

गोपा मधुरा गावो मधुरा
यष्टिर्मधुरा सृष्टिर्मधुरा ।
दलितं मधुरं फलितं मधुरं
मधुराधिपतेरखिलं मधुरम् ।।८।।

@KTBS NOT TO BE REPUBLISHED

# पाठयोजना

| मासाः | पाठाः |
|---|---|
| जून् | सेतुपाठः । प्रार्थना । अक्षराणि । |
| जुलै | परिचयः । नामपदम्। ऋतुपर्वाणि। संख्या । |
| आगस्ट् | पत्राणि । गतिस्त्वं भवानि। सन्धिः। अनुवाद : १-२ |
| सेप्टेम्बर् | अतिथिदेवो भव । उपसर्गाः अव्ययानि च। महर्षिः पाणिनिः। |

@KTBS
NOT TO BE REPUBLISHED

प्रथमः पाठः

# प्रार्थना

(कण्ठपाठः करणीयः)

भारतीयाः देवताप्रार्थनया विना किमपि कार्यं न प्रारभन्ते। प्रार्थनया न केवलं देवतानां परितोषः किन्तु अस्माकं मनसः शान्तिः अपि लभ्यते। प्रार्थनपद्यानां सुष्ठु गानेन आनन्दः जायते।

१. **प्रणम्य शिरसा देवं**
**गौरीपुत्रं विनायकम् ।**
**भक्तावासं स्मरेन्नित्यम्**
**आयुष्कामार्थसिद्धये ।।**



@KTBS NOT TO BE REPUBLISHED



२. **सा मे वसतु जिह्वायां**
**वीणापुस्तकधारिणी ।**
**विरिञ्चिवल्लभा देवी**
**सर्वशुक्ला सरस्वती ।।**

३. **कृष्णाय वासुदेवाय**
**देवकीनन्दनाय च ।**
**नन्दगोपकुमाराय**
**गोविन्दाय नमो नमः ।।**



४. मृत्युञ्जयाय रुद्राय
नीलकण्ठाय शम्भवे।
अमृतेशाय शर्वाय
महादेवाय ते नमः ।।





५. गुरुरादिरनादिश्च
गुरुः परमदैवतम् ।
गुरोः परतरं नास्ति
तस्मै श्रीगुरवे नमः ।।

©KTBS NOT TO BE REPUBLISHED

***************

**अन्वयार्थः**

१. **भक्तावासम् =** भक्तानां हृदये स्थितम्, **गौरीपुत्रम्** = उमायाः पुत्रम्, **विनायकम्**=गणेशं देवम्, **शिरसा प्रणम्य** = मस्तकेन नत्वा, **आयुष्कार्थसिद्धये** = आयुषे इच्छापूरणाय च, **नित्यम्** = प्रतिदिनम्, **स्मरेत्** = भजेत्।

**तात्पर्यम्** - भक्तानां हृदये स्थितम् उमायाः सुतं गणेशं भक्त्या नत्वा अस्माकम् आयुषे अभीष्टसिध्यर्थं च प्रतिदिनं स्मरेत्।

२. **वीणापुस्तकधारिणी** = हस्तयोः वीणां पुस्तकं च धृतवती, **विरिञ्चिवल्लभा** = ब्रह्मणः पत्नी, **सर्वशुक्ला** = श्वेतवसना सा, **सरस्वती देवी** = शारदादेवी, **मे** = मम, **जिह्वायाम्** = रसनायाम् (वाचि), **वसतु** = निवसतु।

**तात्पर्यम्** - हस्ते वीणां पुस्तकं च धृतवती सरस्वती देवी ब्रह्मण:प्रियपत्नी च अस्ति। श्वेतवसना सा शारदा देवी मम जिह्वायां निवसतु।

३. **वासुदेवाय** = वसुदेवस्य पुत्राय, **देवकीनन्दनाय** = देवकीपरितोषणाय सुताय, **नन्दगोपकुमाराय** = नन्दगोपस्य सुताय, **गोविन्दाय** = गोपालाय (कृष्णाय) **नमोनमः** = नमस्कारः।

**तात्पर्यम्** - श्रीकृष्णाय वसुदेव पुत्राय देवकीपरितोषणाय नन्दगोपतनयाय गोपालाय नमः ।

४. **मृत्युञ्जयाय** = शिवाय, **रुद्राय** = शङ्कराय, **नीलकण्ठाय** = विषकण्ठाय, **शम्भवे** = हराय, **अमृतेशाय** = देवतानाम् ईशाय, **शर्वाय** = ईश्वराय, **महादेवाय** = देवश्रेष्ठाय, **नमः** = नमस्कारः।

**तात्पर्यम् -** मृत्युञ्जयं रुद्रं विषकण्ठम् अमराणाम् ईशं महादेवं शिवं शम्भुम् अहं नमामि।

५. **गुरुः** = आचार्यः, **आदिः** = जगदादिकारणः, अनादिः **च** = जननरहितः (नित्यः), **गुरुः** = उपाध्यायः, **परमदैवतम्** = श्रेष्ठदैवतम्, **गुरोः** = आचार्यात्, **परतरम्** = श्रेष्ठतरं न अस्ति, **तस्मै** = तादृशाय (परमात्मस्वरूपाय), **श्रीगुरवे** = आचार्याय, **नमः** = नमस्कारः ।

**तात्पर्यम्** - गुरुः जगदादिकारणः जननरहितः श्रेष्ठदैवतम् । तस्य अपेक्षया श्रेष्ठतरं न अस्ति । तस्मै परमात्मस्वरूपाय आचार्याय नमस्कारः ।

## अभ्यासः

### १. एकवाक्येन उत्तरं लिखत।

१. गौरीपुत्रः कः ?

२. जिह्वायां का वसति?

३. नन्दकुमारः कः ?

©KTBS NOT TO BE REPUBLISHED

४. मृत्युञ्जयः कः ?

५. कः आदिः ?

## २. एतेषां पदानां अन्यलिङ्गरूपं लिखत।

१. देवी ............. २. पुत्रः ...........

३. कुमारी ........... ४. सः .............

## ३. मञ्जूषायां दत्तानि पदानि उपयुज्य रिक्तस्थानं पूरयत ।

(स्मरेत्, वासुदेवाय, श्रीगुरवे, परतरम् )

१. कृष्णाय ............. देवकीनन्दनाय च नमः।

२. भक्तावासं ............................ नित्यम्।

३. गुरोः ................................... नास्ति ।

४. तस्मै ....................................... नमः ।

## ४. एतेषां पदानां पर्यायपदानि लिखत ।

१. विनायकः ........... २. जिह्वा .............

३. गोविन्दः ........... ४. गुरुः .............

## ५. संयोज्य लिखत ।

| | अ | आ |
|---|---|---|
| १. | गौरीपुत्रः | सरस्वती |
| २. | वासुदेवः | शिवः |
| ३. | शर्वः | कृष्णः |
| ४. | वीणाधारिणी | गणेशः |

*****

©KTBS NOT TO BE REPUBLISHED

### द्वितीयः पाठः

# अक्षराणि

भाषायाः लघुतमः घटकः अक्षरम् । अक्षराणां वर्णाः इत्यपि नाम वर्तते। तेषु अक्षरेषु स्वराः व्यञ्जनानि अयोगवाहाः इति प्रधानतया त्रयः भेदाः वर्तन्ते। संस्कृतभाषायां लोकव्यवहारे अष्टचत्वारिंशत् अक्षराणि सन्ति । अत्र तेषां परिचयः प्रदत्तः ।

संस्कृतभाषायाः लिपिः देवनागरी। अस्यां भाषायाम् अष्टचत्वारिंशत् (४८) अक्षराणि व्यवहारे वर्तन्ते। तानि अक्षराणि त्रेधा विभक्तानि । यथा-

**अक्षराणि**
४८

**स्वराः** १३ | **अयोगवाहौ** ०२ | **व्यञ्जनानि** ३३

@KTBS NOT TO BE REPUBLISHED

- **स्वराः** - स्वयं राजन्ते इति स्वराः । स्वतन्त्रतया उच्चार्यमाणाः वर्णाः एव स्वराः। ते आहत्य त्रयोदश (१३) सन्ति । यथा-

**स्वराः - १३** → अ आ इ ई उ ऊ ऋ ॠ ऌ ए ऐ ओ औ

- **स्वरभेदाः** - स्वराणाम् उच्चारणकालम् अनुसृत्य स्वराः द्वेधा विभक्ताः। यथा-

**स्वराः**

ह्रस्वस्वराः - ०५
अ इ उ ऋ ऌ

दीर्घस्वराः - ०८
आ ई ऊ ॠ ए ऐ ओ औ

♦ **अयोगवाहौ -** माहेश्वरसूत्रेषु योगं न प्राप्तौ किन्तु व्यवहारे प्रयुक्तौ अत एव अयोगवाहौ । तौ द्वौ स्तः ।

यथा-




♦ **व्यञ्जनानि -** अर्धमात्राकालेन उच्चार्यमाणाः वर्णाः एव व्यञ्जनानि। तानि आहत्य त्रयस्त्रिंशत् (३३) सन्ति । तानि च प्राधान्येन द्वेधा विभक्तानि । यथा-




@KTBS NOT TO BE REPUBLISHED

♦ **व्यञ्जनभेदाः** - व्यञ्जनानाम् उच्चारणप्रयत्नम् अनुसृत्य व्यञ्जनानि पुनः त्रिधा विभक्तानि । तथा -

# व्यञ्जनानि

| अल्पप्राणाः - १४+४ | महाप्राणाः - १४ | अनुनासिकानि - ०५ |
|---|---|---|
| क् ग् ङ् | ख् घ् | ङ् |
| च् ज् ञ् | छ् झ् | ञ् |
| ट् ड् ण् | ठ् ढ् | ण् |
| त् द् न् | थ् ध् | न् |
| प् ब् म् | फ् भ् | म् |
| य् र् ल् व् | श् ष् स् ह् | |

# गुणिताक्षराणि

- **गुणिताक्षराणि** - स्वरव्यञ्जनयोः संयोगेन उत्पन्नानि अक्षराणि गुणिताक्षराणि इति उच्यन्ते । यथा -

| व्यञ्जनम् | | स्वरः | गुणिताक्षरम् | चिह्नम् |
|---|---|---|---|---|
| क् | + | अ | क | |
| क् | + | आ | का | ा |
| क् | + | इ | कि | ि |
| क् | + | ई | की | ी |
| क् | + | उ | कु | ु |
| क् | + | ऊ | कू | ू |
| क् | + | ऋ | कृ | ृ |
| क् | + | ॠ | कॄ | ॄ |
| क् | + | ऌ | क्लृ | ॢ |
| क् | + | ए | के | े |
| क् | + | ऐ | कै | ै |
| क् | + | ओ | को | ो |
| क् | + | औ | कौ | ौ |

@KTBS NOT TO BE REPUBLISHED

**एवम् इतराणि गुणिताक्षराणि भवन्ति । यथा -**

| | |
|---|---|
| ख खा खि खी खु खू खृ खॄ ख्लृ खे खै खो खौ | ग गा गि गी गु गू गृ गॄ ग्लृ गे गै गो गौ |
| घ घा घि घी घु घू घृ घॄ घ्लृ घे घै घो घौ | ङ ङा ङि ङी ङु ङू ङृ ङॄ ङ्लृ ङे ङै ङो ङौ |

तथैव अयोगवाहव्यञ्जनयोः संयोगेन अपि गुणिताक्षराणि भवन्ति । तथा -

| व्यञ्जनम् | | अयोगवाहः | गुणिताक्षरम् | चिह्नम् | व्यञ्जनम् | | अयोगवाहः | गुणिताक्षरम् | चिह्नम् |
|---|---|---|---|---|---|---|---|---|---|
| क् | + | अं | कं | ं | क् | + | अः | कः | ः |
| क् | + | आं | कां | ां | क् | + | आः | काः | ाः |
| क् | + | इं | किं | िं | क् | + | इः | किः | िः |
| क् | + | ईं | कीं | ीं | क् | + | ईः | कीः | ीः |
| क् | + | उं | कुं | ुं | क् | + | उः | कुः | ुः |
| क् | + | ऊं | कूं | ूं | क् | + | ऊः | कूः | ूः |
| क् | + | ऋं | कृं | ृं | क् | + | ऋः | कृः | ृः |
| क् | + | ॠं | कॄं | ॄं | क् | + | ॠः | कॄः | ॄः |
| क् | + | लृं | क्लृं | लृं | क् | + | लृः | क्लृः | लृः |
| क् | + | एं | कें | ें | क् | + | एः | केः | ेः |
| क् | + | ऐं | कैं | ैं | क् | + | ऐः | कैः | ैः |
| क् | + | ओं | कों | ों | क् | + | ओः | कोः | ोः |
| क् | + | औं | कौं | ौं | क् | + | औः | कौः | ौः |

@KTBS NOT TO BE REPUBLISHED

अधुना कानिचन संस्कृतपदानि रचयितुं शक्यन्ते। यथा-अगः, आखुः, इभः, ईशः इत्यादीनि।

- **संयुक्ताक्षराणि** - यदा व्यञ्जनम् अन्येन व्यञ्जनेन सह संयुज्यते तदा संयुक्ताक्षराणि भवन्ति। यथा-

१. क् + य् - क्य् - वा**क्य**म्                २. र् + म् = र्म् - ध**र्मः**

| | |
|---|---|
| ♦ **वर्णसंयोगः** | ♦ अ+ध्+य्+आ+प्+अ+क्+अः = **अध्यापकः**<br>♦ ल्+इ+ख्+अ+त्+इ=**लिखति** |
| ♦ **वर्णविभागः** | ♦ **प्रौढशाला** = प्+र्+औ+ढ्+अ+श्+आ+ल्+आ<br>♦ **सुधाखण्डः** = स्+उ+ध्+आ+ख्+अ+ण्+ड्+अः |

## अवधेयांशः

# संयुक्ताक्षराणि

संयुक्ताक्षरसन्दर्भे व्यञ्जनानां संयोगः चतुर्भिः प्रकारैः भवति। यथा-

१. प्रथमः - अधिकतया संयुक्ताक्षरेषु प्रथमं अर्धाक्षरं द्वितीयं च पूर्णाक्षरं भवति। उदा -क्य = क्+य, ग्+न=ग्न

प्+स = प्स, म्+ल = म्ल

वाक्यं, लग्नः, प्साति आम्लः चेत्यादीनि।

२. द्वितीयः - यत्र संयोगे प्रथमम् अर्धाक्षरं भवितुं नार्हति तत्र प्रथमं पूर्णाक्षरं द्वितीयं च तस्याधोभागे भवति।

उदा - ङ्+क = ङ्क        द् + व = द्व

ट्+ट = ट्ट        ट्+व =ट्व

अङ्क, ऊद्वा, अट्टः, खट्वाः चेत्यादीनि ।

३. तृतीयः - रकारसंयोगविषये प्रकारद्वयं विद्यते।

२. र अक्षरं संयोगे प्रथमं भवति चेत्

द्वितीयाक्षरं पूर्णतया विलिख्य तदुपरि '◌र्'इति चिह्नं लिख्यते।

उदा : र् + प = र्प,        र्+क = र्क

र् + ग = र्गः,        र्+म = र्म

अर्पयति, अर्कः, वर्गः, धर्मः

NOT TO BE REPUBLISHED @KTBS

४. ‘र्’ अक्षरं संयोगे द्वितीयं भवति चेत् प्रथमाक्षरं पूर्णतया विलिख्य
◌्र चिह्नं लिख्यते यथा
प् + र = प्र, ग् + र = ग्र
ज् + र = ज्र,म् + र = म्र
विप्रः, व्यग्रः, वज्रम्, आम्रम्

५. क्वचित् संयुक्ताक्षरं नूतनम् अक्षरमिव रूपं प्राप्नोति। यथा-
क् + ष = क्ष, त् + र = त्र, ज् + ञ = ज्ञ
द् + य = द्य, द् + म = द्म
पक्षः, छात्रः, प्राज्ञः, अद्य, पद्मम्
भवति । यथा एवमेव अनेकव्यञ्जनसंयोगोऽपि
त् + स् + न् + य् = त्स्न्य, ग् + र् + य = ग्र्य
कात्स्न्र्यम्, ऐकाग्र्यम् चेत्यादीनि ।

## क्रियाकलापः

गुणिताक्षरं तद्विभागयुतमञ्जूषया सह रज्ज्वा योजयत :

कौ | कि | कः | कू | कै | कृ

क्+अः | क्+ऐ | क्+औ | क्+ऋ | क्+इ | क्+ऊ

व्यञ्जनानि संयोज्य तत्संयुक्ताक्षरयुतमञ्जूषया रेखया योजयत।

| | |
|---|---|
| क् + ष | पत्रम् |
| प् + र | पर्व |
| त् + र | प्रकाशः |
| द् + व | विद्या |
| द् + य | अक्षः |
| र् + व | सद्वा |

©KTBS NOT TO BE REPUBLISHED

इमानि अक्षराणि तत्सम्बद्धकण्डोले स्थापयत।

अ, क्ष, पौ, म्, रु, इ, उ, कै, ख्य, र्म, नी, ऋ, ऐ, द्व

| गुणिताक्षराणि | व्यञ्जनानि | संयुक्ताक्षराणि | स्वराः |
|---|---|---|---|
| | | | |

## अभ्यासः

### १. एकवाक्येन उत्तरं लिखत।

१. संस्कृतभाषायां कति वर्णाः सन्ति ?

२. वर्णाः कति प्रकाराः सन्ति ?

३. गुणिताक्षरं कथं भवति ?

४. संयुक्ताक्षरं कथं भवति ?

### २. संयोज्य लिखत ।

| | अ | आ |
|---|---|---|
| १. | अ इ उ ऋ ऌ | अवर्गीयव्यञ्जनानि |
| २. | ञ् म् ङ् ण् न् | तवर्गः |
| ३. | य् र् ल् व् श् ष् स् ह् | अयोगवाहौ |
| ४. | त् थ् द् ध् न् | ह्रस्वस्वराः |
| ५. | अं अः | अनुनासिकानि |

### ३. पदानां वर्णविभागं कुरुत।

१. अमरकोषः = ............................................

२. अर्जुनः = ................................................

३. मण्डोदरी = ..............................................

४. कैकेयी = ................................................

५. जनार्दनः = ..............................................

@KTBS NOT TO BE REPUBLISHED

## ४. वर्णसंयोजनेन पदं रचयत ।

१. क् + उ + म् + आ + र् + अ + व् + य् + आ + स् + अः
= ......................................................................

२. भ् + आ + स् + क् + अ + र् + आ + च् + आ + र् + य् +
अः = ..................................................................

## ५. अधोनिर्दिष्टवर्णान् यथायोग्यं वर्गीकृत्य लिखत ।

अ, ई, ऋ, उ, व, य, त, फ, ख, ज, म, स, ए, औ

| स्वराः | वर्गीयव्यञ्जनानि | अवर्गीयव्यञ्जनानि |
|---|---|---|
| | | |

@KTBS
NOT TO BE REPUBLISHED

## ६. देवनागरीलिप्या लिखत ।

१. ಸರ್ವಜ್ಞಃ
Sarvajnaha

२. ಶತ್ರುಘ್ನಃ
Shatrughnaha

३. ಲಕ್ಷ್ಮಣಃ
Lakshmanaha

४. ಶಾಸ್ತ್ರಮ್
Shastram

## अभ्यासं कुरुत

क का कि की कु कू कृ कॄ क्लृ के कै को कौ कं कः

ख खा खि ... .... .... .... .... .... .... .... .... .... ....

ग गा .... .... .... .... .... .... .... .... .... .... .... ....

घ .... .... .... .... .... .... .... .... .... .... .... .... .....

## अवगच्छत

नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।

उद्धर्तुकामः सनकादिसिद्धान् एतद्विमर्शे शिवसूत्रजालम् ।।

## माहेश्वरसूत्राणि

अइउण् । ऋलृक् । एओङ् । ऐऔच् ।

हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् ।

जबगडदश् । खफछठथचटतव् । कपय् । शषसर् ।

हल् ।

@KTBS NOT TO BE REPUBLISHED

*****

## तृतीयः पाठः

# परिचयः

E9L3D4

भाषाप्रयोगे सम्भाषणं प्रमुखम् । सम्भाषणे प्रश्नोत्तराणि अपि भवन्ति। संस्कृते प्रश्नकरणाय ककारादिशब्दाः अधिकतया प्रयुज्यन्ते। उदाहरणरूपेण एकम् आधुनिकं संस्कृतसम्भाषणम् अत्र प्रदत्तम् ।

**प्रश्नार्थकशब्दाः**

**कः कुत्र किमर्थम् कुतः**

**किम् कति कथम् कियत्**

© KTBS NOT TO BE REPUBLISHED

(शालापरिसरे गणेशः धीरजेन मिलति)

**गणेशः -** अयि भोः ! शुभोदयः ।

**धीरजः -** अयि भोः ! शुभोदयः । भवान् **कः** ?

**गणेशः -** अहम् अद्य नूतनतया शालां प्रविष्टः। भवतः नाम **किम्**?

**धीरजः -** मम नाम धीरजः । भवतः नाम?

**गणेशः -** मम नाम गणेशः।

**धीरजः -** भवान् **कुतः** आगतवान्?

**गणेशः -** अहं मैसूरुनगरात् आगतवान् । भवान् अत्र छात्रः वा?

**धीरजः -** आम्! अहम् अत्र छात्रः । अत्र नगरे भवतः गृहं **कुत्र** अस्ति?

**गणेशः -** मम गृहं जयनगरे अस्ति। भवान् **कदा** शालां प्रविष्टवान्?

**धीरजः -** अहं गतवत्सरे प्रविष्टवान्। **किमर्थं** भवान् नगरम् आगतवान्?

**गणेशः -** मम पिता अत्र उद्योगं प्राप्तवान्। अतः अहम् अत्र आगतः।

**धीरजः -** भवतः गृहे **कति** जनाः सन्ति?

**गणेशः -** मम गृहे चत्वार जनाः सन्ति। भवतः?

**धीरजः -** मम गृहे अहं भगिनी अनुजः पितरौ चेति पञ्च जनाः स्मः।

**गणेशः -** **कथम्** अस्ति एषा शाला?

**धीरजः -** उत्तमा अस्ति। अध्यापकाः सुष्ठु पाठयन्ति।

**गणेशः -** **कियन्तः** छात्राः अध्यापकाः च सन्ति?

**धीरजः -** शालायाम् आहत्य त्रिशतं छात्राः सन्ति। दश अध्यापकाः च सन्ति।

**गणेशः -** पाठ्यपुस्तकानां मूल्यं **कियत्** अस्ति?

**धीरजः -** अत्र पठ्यपुस्तकानि निश्शुल्करूपेण दीयन्ते।

**गणेशः -** एवं वा? भवतः परिचयात् सन्तोषः जातः । **किं** मां मित्रत्वेन स्वीकरोति?

**धीरजः -** अवश्यम्। अद्य आरभ्य भवान् अपि मम मित्रम् । आगच्छतु शालां गच्छामः

**गणेशः -** आम् । गच्छामः । धन्यवादः ।

(उभौ गमिष्यतः)

*****

NOT TO BE REPUBLISHED ©KTBS

G7Y5E7

## चतुर्थः पाठः

# नामपदम्

अर्थयुतेन अक्षरसमूहेन पदानि जायन्ते । पदानि कस्यचित् वस्तुनः, जीविनः, गुणविशेषस्य वा अभिधानं कुर्वन्ति। अतः तानि नामपदानि इत्युच्यन्ते । नाम पदानि एव भाषायाः मूलभूतानि प्रमुखानि घटकानि। भाषाध्ययनस्य आदौ नामपदानि ज्ञातव्यानि इति धिया तेषां लघुः परिचयः अत्र प्रदत्तः।

नामबोधकानि पदानि नामपदानि। संस्कृते द्विवचनमपि वर्तते। अतः नामपदानि त्रिषु वचनेषु सप्तसु विभक्तिषु च भवन्ति। एतानि त्रिषु लिङ्गेषु पुनः विभक्तानि। नामपदानां मूलरूपं प्रातिपदिकम् इति कथ्यते। यथा- रामःइत्यस्य राम, रविः इत्यस्य रवि, पिता इत्यस्य पितृ चेत्यादीनि प्रातिपदिकानि। प्रत्येकं प्रातिपदिकस्य विभक्त्यनुसारेण वचनानुसारेण च विभिन्नरूपाणि भवन्ति। तथैव प्रातिपदिकस्य अन्त्ये यदक्षरं भवति तदन्तत्वेन तस्य पदस्य व्यवहारः क्रियते। यथा - राम इत्येतत् अकारान्तं पदम्। रवि इत्येतत् इकारान्तं पदम् इत्यादीनि। कानिचन उदाहरणानि दिङ्मात्राणि इह दर्शितानि।

### अकारन्तः पुंलिङ्गः "राम" शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **ಕನ್ನಡದಲ್ಲಿ ವಿಭಕ್ತಿ ಪ್ರತ್ಯಯಗಳು** | **ಅರ್ಥ** | **Meaning** |
|---|---|---|---|---|---|---|
| प्रथमा | रामः | रामौ | रामाः | ಉ | ರಾಮನು | Rama |
| द्वितीया | रामम् | रामौ | रामान् | ಅನ್ನು | ರಾಮನನ್ನು | To Rama |
| तृतीया | रामेण | रामाभ्याम् | रामैः | ಇಂದ | ರಾಮನಿಂದ | By/with Rama |
| चतुर्थी | रामाय | रामाभ्याम् | रामेभ्यः | ಗೆ | ರಾಮನಿಗೆ | For Rama |
| पञ्चमी | रामात् | रामाभ्याम् | रामेभ्यः | ದೆಸೆಯಿಂದ | ರಾಮನ ದೆಸೆಯಿಂದ | From Rama |
| षष्ठी | रामस्य | रामयोः | रामाणाम् | ಅ | ರಾಮನ | Of Rama |
| सप्तमी | रामे | रामयोः | रामेषु | ಅಲ್ಲಿ | ರಾಮನಲ್ಲಿ | In/on Rama |
| सं.प्र | हे! राम | हे! रामौ | हे! रामाः | ಎಲೈ | ಎಲೈ ರಾಮನೇ | O! Rama |

NOT TO BE REPUBLISHED ©KTBS

एवम् एव अन्ये सोमभीमशुकगजवृक्षगोविन्दादयः अकारान्ताः पुंलिङ्गशब्दाः ज्ञेयाः ।

## आकारान्तः स्त्रीलिङ्गः 'गीता' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गीता | गीते | गीताः |
| द्वितीया | गीताम् | गीते | गीताः |
| तृतीया | गीतया | गीताभ्याम् | गीताभिः |
| चतुर्थी | गीतायै | गीताभ्याम् | गीताभ्यः |
| पञ्चमी | गीतायाः | गीताभ्याम् | गीताभ्यः |
| षष्ठी | गीतायाः | गीतयोः | गीतानाम् |
| सप्तमी | गीतायाम् | गीतयोः | गीतासु |
| सम्बोधनम् | हे गीते! | हे गीते! | हे गीताः! |

एवम् एव मालालतासीतारमामहिलादयः आकारान्ताः स्त्रीलिङ्गशब्दाः ज्ञेयाः।

## अकारान्तः नपुंसकलिङ्गः 'वन' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वनम् | वने | वनानि |
| द्वितीया | वनम् | वने | वनानि |
| तृतीया | वनेन | वनाभ्याम् | वनैः |
| चतुर्थी | वनाय | वनाभ्याम् | वनेभ्यः |
| पञ्चमी | वनात् | वनाभ्याम् | वनेभ्यः |
| षष्ठी | वनस्य | वनयोः | वनानाम् |
| सप्तमी | वने | वनयोः | वनेषु |
| सम्बोधनम् | हे वन! | हे वने ! | हे वनानि! |

NOT TO BE REPUBLISHED @KTBS

एवम् एव ज्ञानफलनगरजलकमलादयः अकारान्ताः नपुंसकलिङ्गशब्दाः ज्ञेयाः।

## इकारान्तः पुंलिङ्गः 'कवि' शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | कविः | कवी | कवयः |
| द्वितीया | कविम् | कवी | कवीन् |
| तृतीया | कविना | कविभ्याम् | कविभिः |
| चतुर्थी | कवये | कविभ्याम् | कविभ्यः |
| पञ्चमी | कवेः | कविभ्याम् | कविभ्यः |
| षष्ठी | कवेः | कव्योः | कवीनाम् |
| सप्तमी | कवौ | कव्योः | कविषु |
| सम्बोधनम् | हे कवे! | हे कवी! | हे कवयः! |

एवम् एव रवि-हरि-कप्यादयः इकारान्ताः पुलिङ्गशब्दाः ज्ञेयाः।

## इकारान्तः स्त्रीलिङ्गः 'मति' शब्दः

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | मतिः | मती | मतयः |
| द्वितीया | मतिम् | मती | मतीः |
| तृतीया | मत्या | मतिभ्याम् | मतिभिः |
| चतुर्थी | मत्यै/मतये | मतिभ्याम् | मतिभ्यः |
| पञ्चमी | मत्याः/मतेः | मतिभ्याम् | मतिभ्यः |
| षष्ठी | मत्याः/मतेः | मत्योः | मतीनाम् |
| सप्तमी | मत्याम्/मतौ | मत्योः | मतिषु |
| सम्बोधनम् | हे मते! | हे मती! | हे मतयः! |

©KTBS NOT TO BE REPUBLISHED

एवम् एव कान्तिबुद्धिसिध्यादयः इकारान्ताः स्त्रीलिङ्गशब्दाः ज्ञेयाः।

## इकारान्तः नपुंसकलिङ्गः 'वारि' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | वारि | वारिणी | वारीणि |
| द्वितीया | वारि | वारिणी | वारीणि |
| तृतीया | वारिणा | वारिभ्याम् | वारिभिः |
| चतुर्थी | वारिणे | वारिभ्याम् | वारिभ्यः |
| पञ्चमी | वारिणः | वारिभ्याम् | वारिभ्यः |
| षष्ठी | वारिणः | वारिणोः | वारीणाम् |
| सप्तमी | वारिणि | वारिणोः | वारिषु |
| सम्बोधनम् | हे वारि! हे वारे | हे वारिणी! | हे वारीणि! |

एवम् एव अक्षिदध्यादयः इकारान्ताः नपुंसकलिङ्गशब्दाः ज्ञेयाः।

## उकारान्तः पुंलिङ्गः 'गुरु' शब्दः

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | गुरुः | गुरू | गुरवः |
| द्वितीया | गुरुम् | गुरू | गुरून् |
| तृतीया | गुरुणा | गुरुभ्याम् | गुरुभिः |
| चतुर्थी | गुरवे | गुरुभ्याम् | गुरुभ्यः |
| पञ्चमी | गुरोः | गुरुभ्याम् | गुरुभ्यः |
| षष्ठी | गुरोः | गुर्वोः | गुरूणाम् |
| सप्तमी | गुरौ | गुर्वोः | गुरुषु |
| सम्बोधनम् | हे गुरो! | हे गुरू! | हे गुरवः! |

एवमेव भानुशम्भुमनुसाधुधात्वादयः उकारान्ताः पुंलिङ्गशद्बाः ज्ञेयाः।

©KTBS NOT TO BE REPUBLISHED

# क्रियाकलापः

## प्रथमाविभक्तिः

**उदाहरणम् - (व्याध)...................... जालं प्रसारयति।**

(व्याधः जालं प्रसारयति।)

१) (वाल्मीकि) ................................. रामायणं रचितवान्।

२) (मुनि) ................................... आश्रमम् आगच्छति।

३) (लता) ........................................ प्रवासं गच्छति।

४) (गौरी) ........................................ पायसं करोति।

५) (फलं) ......................................... रुचिकरं भवति।

६) (नट) ..........................................अभिनयं करोति।

७) (सीता) ........................................गीतं गायति।

८) (कपि) ........................................वृक्षम् आरोहति।

९) (गज) ......................................इक्षुदण्डान् खादति।

**निस्सारस्य पदार्थस्य प्रायेणाडम्बरो महान् ।**
**न हि स्वर्णे ध्वनिस्तादृक् कंसे यादृक् प्रजायते ।।**

@KTBS
NOT TO BE REPUBLISHED

## द्वितीयाविभक्तिः

**उदाहरणम् - आचार्यः .................. (शाला) गच्छति।**

(आचार्यः <u>शालां</u> गच्छति।)

१) भक्तः .....................................(गौरीपुत्रः) नमति।

२) सरस्वती हस्ते .................................. (वीणा) धरति।

३) शिष्यः गुरोः ................................ (वचनम्) श्रुणोति।

४) प्रतापसिंहः .......................... (भयोत्पादकाः) अमारयत्।

५) कपोता ................................... (पतिः) उक्तवती।

६) तेजस्विनी ............................... (नगर) गच्छति।

७) पवनः .................................. (विद्यालयः) गच्छति।

८) रेखा ........................... (पुष्पमालिका) रमायै यच्छति।

९) पाचकः .................................. (पाकः) करोति।

१०) शिशुः ................................ (पेटिका) उद्घाटयति।

@KTBS NOT TO BE REPUBLISHED

# तृतीयाविभक्तिः

**उदाहरणम् - आरक्षकः .............. (दण्डः) ताडयति।**

(आरक्षकः दण्डेन ताडयति।)

१) उपमन्युः धौम्यस्य ......................(अनुग्रहः) ज्ञानी अभवत्।

२) सैनिकः ................................ (आयुधम्) युद्धं करोति।

३) भारतदेशः .............................. (अहिंसा) विश्वं जयति।

४) उद्यानं ............................ (फलपुष्पाणि) शोभते।

५) रामायणं .................................. (वाल्मीकिः) रचितम्।

६) अहम् ................................ (उष्णजलं) स्नानं करोमि।

७) बालिकाः ................................... (कन्दुकं) क्रीडन्ति।

८) रमा ......................................... (लेखनी) लिखति।

९) विनयः .................................. (चषकः) क्षीरं पिबति।

१०) पुष्पं ................................. (सुगन्धः) शोभते।

@KTBS NOT TO BE REPUBLISHED

## चतुर्थीविभक्तिः

**उदाहरणम् - उपमन्युः ........ (धौम्यः) भिक्षान्नं समर्पयति।**

(उपमन्युः धौम्याय भिक्षान्नं समर्पयति।)

१) कपोतः ......................(व्याधः) स्वमांसं यच्छति।

२) तापसी ......................... (सर्वदमनः) क्रीडनकं यच्छति।

३) साधुः ......................... (किरातः) दशरूप्यकाणि ददाति।

४) .............. (आधुनिकविज्ञानं) ऋषीणां योगदानम् अपरिमितम्।

५) अरविन्दः................................ (सेवकः) धनं यच्छति।

६) माता .................................. (पुत्री) पुस्तकं ददाति।

७) बालिका .......................... (महिला) कङ्कणं दास्यति।

८) चिदानन्दः .............................. (मित्रं) लेखनीं ददाति।

@KTBS NOT TO BE REPUBLISHED

## पञ्चमीविभक्तिः

**उदाहरणम् - व्याधः कपोतां ....... (पञ्जर) विमोचितवान्।**

(व्याधः कपोतां <u>पञ्जरात्</u>-विमोचितवान्।)

१) छात्राः .....................(गृहः) क्रीडाङ्गणं गच्छान्ति।

२) उपमन्युः.............................. (वनं) न आगतवान्।

३) अश्विनीकुमारौ ....................... (देवलोकः) आगतवन्तौ।

४) पर्णं .......................... (वृक्षः) पतति।

५) भयोत्पादकाः .......................... (विदेशः) आगच्छन्ति।

६) छात्राः ............................ (विद्यालयः) गृहं गच्छन्ति।

७) सेवकः ........................... (वाटिका) पुष्पम् आनयति।

८) गायत्री ..................... (नदी) जलम् आनीय पाकं करोति।

९) मम मित्रं ................................. (ग्रामः) आगच्छति।

१०) त्वम् .............................. (मन्दिरं) शीघ्रम् आगच्छ।

@KTBS NOT TO BE REPUBLISHED

## षष्ठीविभक्तिः

**उदाहरणम् - आरुणिः.............. (धौम्यः) शिष्यः।**

(आरुणिः <u>धौम्यस्य</u> शिष्यः।)

१) ..................................(प्रतापसिंहः) मातुलः देशभक्तः ।

२) ................................ (चैत्रमासः) अनन्तरं वैशाखमासः।

३) लता ........................................... (सुजाता) सखी।

४) व्याधेन ................................(कपोता) पतिः गृहीतः।

५) रामस्य आदर्शगुणाः .............. (रामायणम्) बालकाण्डे सन्ति।

६) रामस्य.................................... (जननी) नाम कौसल्या।

७) मम ....................................... (मित्रम्) नाम सुरेशः।

८) मम .................................... (अङ्कनी) नाम अप्सरा।

९) ............................. (संस्कृतम्) अनुरागिणः सर्वत्र सन्ति।

१०) ..................................... (रमा) पतिः भगवान् विष्णुः।

@KTBS
NOT TO BE REPUBLISHED

## सप्तमीविभक्तिः

**उदाहरणम् - उपमन्युः ................ (कूपः) पतति।**

(उपमन्युः कूपे पतति।)

१) रामनवमी ................................(चैत्रमासः) भविष्यति।

२) कपोतः ........................................ (जालम्) पतितः।

३) मीनः .................................................. (नदी) अस्ति।

४) दशरथः .......................... (अयोध्या) शासनं करोति स्म।

५) शिष्यः .................................. (गुरुः) भक्तिं प्रदर्शयति।

६) सुधाखण्डः ................................. (उत्पीठिका) अस्ति।

७) पुस्तकं ........................................... (स्यूतः) वर्तते।

८) भ्रमरः ...................................... (पुष्पं) उपविशति।

९) अध्यापकः ............................... (कृष्णफलकं) लिखति।

१०) छात्राः .......................................... (शाला) सन्ति।

@KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. एकवाक्येन उत्तरत।

१. नामपदं नाम किम्?

२. नामपदस्य मूलरूपं किम्?

३. रामः इत्यस्य प्रातिपदिकं किम्?

४. गुरुः इत्येतत् पदं कस्मिन् लिङ्गे वर्तते?

### २. इतरवचनरूपाणि लिखत।

१. रामः ____________ ____________

२. रवये ____________ ____________

३. कस्य ____________ ____________

४. अहम् ____________ ____________

### ३. लिङ्गविभक्तिवचनानि लिखत।

१. रामे२. लतायै ३. फलेषु ४. गुरुभ्यः ५. कयोः

६. मती

@KTBS NOT TO BE REPUBLISHED

### ४. चतुर्थं पदं लिखत ।

१. मधु - नपुंसकलिङ्गः : : धेनुः - ____________

२. मया - अस्माभिः : : कया - ____________

३. त्वाम् - द्वितीयाविभक्तिः : : मयि - ____________

५. ताभ्याम् - द्विवचनम् : : तेषु - ____________

## समुचितपदेन रिक्तस्थानं पूरयत।

| १. | पदम् | प्रातिपदिकम् | अन्तः |
|---|---|---|---|
| | उपमन्युः | उपमन्यु | उकारान्तः |
| | प्रार्थना | | |
| | गौरी | | |
| | शिष्यः | | |
| | भयोत्पादकः | | |
| | कविः | | |
| | गुरुः | | |
| | मतिः | | |
| | रामस्य | | |

@KTBS NOT TO BE REPUBLISHED

| २. | पदम् | वचनम् |
|---|---|---|
| | छात्रैः | बहुवचनम् |
| | नारदः | |
| | अरण्यम् | |
| | ऋतवः | |
| | कविभ्याम् | |
| | गौरीः | |

| ३. | पदम् | विभक्तिः |
|---|---|---|
| | शिष्यस्य | षष्ठी विभक्तिः |
| | छात्रेषु | |
| | गोविन्दाय | |
| | तस्मै | |
| | कपोतायाः | |
| | पाठशालाम् | |

| ४. | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| | कस्मात् | काभ्याम् | केभ्यः |
| | | | तेषाम् |
| | | | शिष्यैः |
| | कवेः | | |
| | | व्याधाभ्याम् | |
| | सर्वदमनस्य | | |

@KTBS NOT TO BE REPUBLISHED

**अवधेयांशः**

**सर्वनामशब्दाः**

| **दकारन्तः पुंलिङ्गः 'तद्' शब्दः** | | | | **मकारन्तः पुंलिङ्गः 'किम्' शब्दः** | | |
|---|---|---|---|---|---|---|
| विभक्तिः | एक | द्वि | बहु | एक | द्वि | बहु |
| प्रथमा | सः | तौ | ते | कः | कौ | के |
| द्वितीया | तम् | तौ | तान् | कम् | कौ | कान् |
| तृतीया | तेन | ताभ्याम् | तैः | केन | काभ्याम् | कैः |

| | | | | | | |
|---|---|---|---|---|---|---|
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः | कस्मै | काभ्याम् | केभ्यः |
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् | कस्य | कयोः | केषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु | कस्मिन् | कयोः | केषु |

| **दकारन्तः स्त्रीलिङ्गः 'तद्' शब्दः** | | | | **मकारन्तः स्त्रीलिङ्गः 'किम्' शब्दः** | | |
|---|---|---|---|---|---|---|
| **विभक्तिः** | **एक** | **द्वि** | **बहु** | **एक** | **द्वि** | **बहु** |
| प्रथमा | सा | ते | ताः | का | के | काः |
| द्वितीया | ताम् | ते | ताः | काम् | के | काः |
| तृतीया | तया | ताभ्याम् | ताभिः | कया | काभ्याम् | काभिः |
| चतुर्थी | तस्यै | ताभ्याम् | ताभ्यः | कस्यै | काभ्याम् | काभ्यः |
| पञ्चमी | तस्याः | ताभ्याम् | ताभ्यः | कस्याः | काभ्याम् | काभ्यः |
| षष्ठी | तस्याः | तयोः | तासाम् | कस्याः | कयोः | कासाम् |
| सप्तमी | तस्याम् | तयोः | तासु | कस्याम् | कयोः | कासु |

| **दकारन्तः नपुंसकलिङ्गः 'तद्' शब्दः** | | | | **मकारन्तः नपुंसकलिङ्गः 'किम्' शब्दः** | | |
|---|---|---|---|---|---|---|
| **विभक्तिः** | एक | द्वि | बहु | एक | द्वि | बहु |
| प्रथमा | तत् | ते | तानि | किम् | के | कानि |
| द्वितीया | तत् | ते | तानि | किम् | के | कानि |
| तृतीया | तेन | ताभ्याम् | तैः | केन | काभ्याम् | कैः |
| चतुर्थी | तस्मै | ताभ्याम् | तेभ्यः | कस्मै | काभ्याम् | केभ्यः |

© KTBS NOT TO BE REPUBLISHED

| | | | | | | |
|---|---|---|---|---|---|---|
| पञ्चमी | तस्मात् | ताभ्याम् | तेभ्यः | कस्मात् | काभ्याम् | केभ्यः |
| षष्ठी | तस्य | तयोः | तेषाम् | कस्य | कयोः | केषाम् |
| सप्तमी | तस्मिन् | तयोः | तेषु | कस्मिन् | कयोः | केषु |

**दकारान्तः त्रिषु लिङ्गेषु समानः 'अस्मद्' शब्दः**

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| अहम्<br>ನಾನು I | आवाम्<br>ನಾವಿಬ್ಬರು we both | वयम्<br>ನಾವು we all |
| माम् (मा)<br>ನನ್ನನ್ನು me | आवाम्, (नौ)<br>ನಮ್ಮಿಬ್ಬರನ್ನು we both | अस्मान् (नः)<br>ನಮ್ಮನ್ನು we all |
| मया<br>ನನ್ನಿಂದ By me | आवाभ्याम्<br>ನಮ್ಮಿಬ್ಬರಿಂದ By both of us | अस्माभिः<br>ನಮ್ಮಿಂದ By us |
| मह्यम् (मे)<br>ನನಗೆ For me | आवाभ्याम् (नौ)<br>ನಮ್ಮಿಬ್ಬರಿಗೆ For both of us | अस्मभ्यम् (नः)<br>ನಮಗೆ For all of us |
| मत्<br>ನನ್ನ ದೆಸೆಯಿಂದ<br>From me | आवाभ्याम्<br>ನಮ್ಮಿಬ್ಬರ ದೆಸೆಯಿಂದ<br>From both of us | अस्मत्<br>ನಮ್ಮ ದೆಸೆಯಿಂದ<br>From all of us |
| मम्, (मे)<br>ನನ್ನ of me/ mine/my | आवयोः, (नौ)<br>ನಮ್ಮಿಬ್ಬರ of both of us | अस्माकम् (नः)<br>ನಮ್ಮ ours |
| मयि<br>ನನ್ನಲ್ಲಿ in me | आवयोः<br>ನಮ್ಮಿಬ್ಬರಲ್ಲಿ in both of us | अस्मासु<br>ನಮ್ಮಲ್ಲಿ in all of us |

@KTBS NOT TO BE REPUBLISHED

## दकारान्तः त्रिषु लिङ्गेषु समानः 'युष्मद्' शब्दः

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| त्वम्<br>ನೀನು You | युवाम्<br>ನೀವಿಬ್ಬರು You both | यूयम्<br>ನೀವು you all |
| त्वाम्, (त्वा)<br>ನಿನ್ನನ್ನು You | युवाम्, (वाम्)<br>ನಿಮ್ಮಿಬ್ಬರನ್ನು You both | युष्मान् (वः)<br>ನಿಮ್ಮನ್ನು You all |
| त्वया<br>ನಿನ್ನಿಂದ By You | युवाभ्याम्<br>ನಿಮ್ಮಿಬ್ಬರಿಂದ By You both | युष्माभिः<br>ನಿಮ್ಮಿಂದ By You all |
| तुभ्यम् (ते)<br>ನಿನಗೆ For You | युवाभ्याम् (वाम्)<br>ನಿಮ್ಮಿಬ್ಬರಿಗೆ For both of You | युष्मभ्यम्, (वः)<br>ನಿಮಗೆ For You all |
| त्वत्<br>ನಿನ್ನ ದೆಸೆಯಿಂದ<br>From You | युवाभ्याम्<br>ನಿಮ್ಮಿಬ್ಬರ ದೆಸೆಯಿಂದ<br>From both of You | यष्मत्<br>ನಿಮ್ಮ ದೆಸೆಯಿಂದ<br>From all of You |
| तव, (ते)<br>ನಿನ್ನ of You (Yours) | युवयोः (वाम्)<br>ನಿಮ್ಮಿಬ್ಬರ of You both | युष्माकम् (वः)<br>ನಿಮ್ಮ You all (Yours) |
| त्वयि<br>ನಿನ್ನಲ್ಲಿ in You | युवयोः<br>ನಿಮ್ಮಿಬ್ಬರಲ್ಲಿ in both of You | युष्मासु<br>ನಿಮ್ಮಲ್ಲಿ in You all |

©KTBS NOT TO BE REPUBLISHED

✻ **आवरणे दत्तं पदम् उपयुज्य वाक्यं कुर्वन्तु ।**

१. अहं नमामि । (गुरुः)

२. किरणाः प्रखराः । (भानुः)

३.    क्षीरं मधुरम् अस्ति । (धेनुः)

४.    अहं  स्वीकरोमि । (मधु)

५.    शालां नयतु । (अहम्)

६.     नाम गोपालः । (अहम्)

७.    गुरुः  लेखनीं ददाति ? (किम्)

८.    नाम किम्? (त्वम्)

९.    स्वसा  गृहं गच्छति । (माता)

१०.  सः  धनं यच्छति । (पिता)

***  उदाहरणानुसारं वाक्यानि लिखन्तु ।**

१.    अहं छात्रः अस्मि । आवां छात्रौ स्वः । वयं छात्राः स्मः ।

२.    अहं बालिका अस्मि ।

............................................................।

............................................................।

३.    अहं गुरुः अस्मि ।

............................................................।

............................................................।

@KTBS NOT TO BE REPUBLISHED

४. अहं भ्राता अस्मि ।

..........................................................।

..........................................................।

**✻ योग्यविभक्तिरूपाणां योजनेन वाक्यानि रचयित्वा, रिक्तस्थाने लिखतु ।**

यथा- मम धनं स्वीकरोतु ।

१. .....................................................।

२. .....................................................।

३. .....................................................।

४. .....................................................।

५. .....................................................।

६. .....................................................।

७. .....................................................।

**ऋतुर्व्यतीतः परिवर्तते पुनः**
**क्षयं प्रयाता पुनरेति चन्द्रमाः।**
**गतं गतं नैव तु संनिवर्तते**
**जलं नदीनां च नृणांच यौवनम्।।**

@KTBS NOT TO BE REPUBLISHED

## पञ्चमः पाठः

# ऋतुपर्वाणि

भारतीयकालगणनायां आहत्य द्वादश मासाः सन्ति। प्रत्येकं मासद्वयस्य एकः ऋतुः भवति। तेषु ऋतुषु आचर्यमाणानां प्रमुखपर्वदिनानां परिचयः अत्र प्रदत्तः।



(अध्यापिका कक्ष्यां प्रविशति। छात्राः सर्वे उत्तिष्ठन्ति।)

**छात्राः** - सुप्रभातं महोदये।

**अध्यापिका** - सुप्रभातम्। उपविशन्तु। अद्य अहं नवीनविषयम् एकं पाठयामि। भवतः सर्वान् उद्यानं नयामि। तत्र प्रकृतेः शोभां दर्शयामि।

**छात्राः** - भवतु महोदये! वयम् अपि बहिः गन्तुम् इच्छामः।

**अध्यापिका** - सर्वे आगच्छन्तु।

(सर्वे उद्यानं गच्छन्ति)

| | | |
|---|---|---|
| **राजेशः** | - | पश्य! पश्य ! तत्र वर्णरञ्जितानि पुष्पाणि सन्ति। |
| **समीरः** | - | आम्। वायुः अपि मन्दं मन्दं वाति। |
| **कुमारः** | - | अहं चिन्तयामि सायङ्काले वृष्टिः भविष्यति इति। |
| **जोसेफ्** | - | इदानीं वर्षर्तुः किम् ? |
| **अध्यापिका** | - | न, न। इदानीं वसन्तर्तुः। किं भवान् ऋतूनां विषये न जानाति? |
| **बादल्** | - | आम् महोदये! इदानीं स्मरामि। मम माता उक्तवती आसीत्। |
| **लता** | - | महोदये! एतेषाम् ऋतूनां विषये ज्ञातुम् इच्छामि। |
| **छात्राः** | - | वयम् अपि इच्छामः। |
| **अध्यापिका** | - | अस्तु क्रमशः वदामि। सर्वस्यादौ भवति वसन्तर्तुः। एषः ऋतूनां राजा इति कथ्यते। अस्य आगमनेन प्रकृतिः फलपुष्पैः शोभते। गगनं निर्मलं भवति। तटाकेषु शुद्धं जलं विराजते। अतः अयम् ऋतुः श्रेष्ठतमः। भारतीयानाम् एतत् नूतनवर्षारम्भदिनम्। |
| **सलीम्** | - | अतः एव एतत् उद्यानं शोभते खलु? |
| **अध्यापिका** | - | किं विस्मृतं वा? अग्रिमः ऋतुः ग्रीष्मः। ग्रीष्मे आतपः प्रखरः भवति। अयं घर्मकालः। ग्रीष्मर्तोः अन्त्यसमये आकाशे मेघाः भवन्ति। अस्मिन् ऋतौ विशेषपर्वदिनानि न सन्ति। |

@KTBS NOT TO BE REPUBLISHED

**लता** - आम्। तदा घर्मकालविरामः भवति।

**अध्यापिका** - हे छात्राः! अग्रिमः ऋतुः कः?

**कुमारः** - अहं वदामि। वर्षर्तुः किल।

**अध्यापिका** - आम्। ग्रीष्मानन्तरं वर्षर्तुः। एतस्मिन् ऋतौ मेघाः गर्जन्ति वर्षन्ति च। वृष्ट्या सर्वत्र जलं दृश्यते। नद्यः जलपूर्णाः प्रवहन्ति च। वर्षर्तौ विशेषः वर्तते। जानन्ति वा?

**छात्राः** - न, न। वदतु महोदये।

**अध्यापिका** - श्रावणपूर्णिमायां संस्कृतदिनं सर्वत्र आचर्यते।

**छात्राः** - महान् सन्तोषः। वयम् अपि शालायां संस्कृतदिनम् आचरामः।

**अध्यापिका** - अग्रिमः ऋतुः शरत्। अस्मिन् वृष्टिकालः समाप्तः भवति। सर्वत्र हरिद्वर्णसस्यानि दृश्यन्ते। रात्रौ चन्द्रः सम्यक् प्रकाशते।

शरदृतोः समनन्तरं हेमन्तर्तुः भवति। अयं शैत्यकालः। प्रातः रात्रौ च अत्यधिकं शैत्यं भवति। तथैव अस्मिन् ऋतौ मकरसङ्क्रान्तिः आचर्यते।

**समीरः** - मकरसङ्क्रमणम् अस्माकं ग्रामे अत्यन्तं वैभवेन आचरन्ति। अन्तिमः शिशिरः खलु?

**अध्यापिका** - सत्यम्। अयं शैत्यस्य अन्त्यकालः। वृक्षाः पर्णविहीनाः दृश्यन्ते। वायुः महता वेगेन वाति। अस्मिन् शिवरात्रिपर्व आचर्यते।

©KTBS NOT TO BE REPUBLISHED

**प्रतिमा** - एवं वा? भारते ऋतूनाम् आधारेण पर्वदिनानि आचरन्ति वा?

**अध्यापिका** - सत्यम्। इस्लां धर्मीयाः क्रैस्तधर्मीयाः अपि कालानुसारेण तेषां पर्वाणि आचरन्ति।

**छात्राः** - अद्य वयम् ऋतून् ज्ञातवन्तः। धन्यवादाः।

**अध्यापिका** - अस्तु। समयः अतीतः। शालां गच्छामः।

(निष्क्रान्ताः सर्वे)

## शब्दार्थाः

**शोभा** - कान्तिः, द्युतिः

**उद्यानम्** - उपवनम्

**पुष्पम्** - सुमम्, कुसुमम्

**समीरः** - वायुः

**वर्षम्** - वृष्टिः

**इदानीम्** - अधुना

**श्रेष्ठः** - उत्तमः

**निर्मलम्** - शुद्धम्, स्वच्छम्

**आकाशः** - गगनम्

**तटाकम्** - कासारः

**सरः** - सरोवरः

**जलम्** - तोयम्, उदकम्, सलिलम्

**भ्रमरः** - भृङ्गः, षट्पदः

**आम्रवृक्षः** - रसालवृक्षः

**पिकः** - कोकिलः, परभृत्

**अभ्यङ्गस्नानम्** - तैलस्नानम्

**स्वादिष्टम्** - रुचिकरम्

**प्रतियोगिता** - स्पर्धा

## अभ्यासः

### १. एकवाक्येन उत्तरं लिखत ।

१. छात्राः सर्वे कुत्र गच्छन्ति ?

२. ऋतवः कति भवन्ति ?

३. ऋतूनां राजा कः ?

@KTBS
NOT TO BE REPUBLISHED

## २. कोष्टके दत्तं पदं चित्वा रिक्तस्थानानि पूरयत।

(फलपुष्पैः, वार्तालापः, मन्दं मन्दं)

१. परस्परं ................................ एव सम्भाषणम्।

२. उद्याने वायुः ............................ वाति।

३. वसन्तर्तोः आगमनेन प्रकृतिः ......................शोभते।

## ३. विलोमपदं पाठात् चित्वा लिखत ।

यथा - प्राचीनम् x नवीनम्

१. अन्तः x ...............

२. दुःखम् x ...............

३. निरुत्साहः x ...............

४. अपथ्यम् x ...............

५. असत्यम् x ...............

## ४. सन्धिं विभज्य नाम लिखत।

यथा - वर्षर्तुः = वर्षा + ऋतुः = गुणसन्धिः।

१. प्रवासार्थम् = ........... + ........... = ...........।

२. सर्वोत्तमः = ............ + ............ = ............।

३. वसन्तर्तुः = ............. + ............ = ...........।

४. विभागोऽस्ति = .......... + ........... = ...........।

@KTBS NOT TO BE REPUBLISHED

## ६. यथानिर्देशं लिखत।

१. वायुः अपि मन्दं मन्दं वाति।

कः पाठः ? कः वदति? कं वदति?

२. वर्षर्तुः किल।

कः पाठः ? कः वदति? कां वदति?

३. भारतीयानाम् एतत् नूतनवर्षारम्भदिनम्।

कः पाठः ? का वदति? कं वदति?

४. वयमपि शालायां संस्कृतदिनम् आचरामः।

कः पाठः ? कदा संस्कृतदिनं भवति? के वदन्ति?

## ७. आम् वा न इति लिखत।

उदा- ऋतवः सप्त सन्ति। [न]

१. सर्वस्यादौ भवति वसंतर्तुः। [ ]

२. ग्रीष्मानन्तरं शरदृतुः भवति। [ ]

३. शरदृतो समनन्तरं हेमन्तर्तुः भवति। [ ]

४. शिशिर ऋतौ वृक्षाः पर्णविहीना दृश्यन्ते। [ ]

## ८. दशभिः वाक्यैः उत्तरं कर्णाटकभाषया आङ्ग्लभाषया वा लिखत।

१. षड् ऋतवः के ? वसन्तर्तुं वर्णयत।

*****

© KTBS NOT TO BE REPUBLISHED

## क्रियाकलापः

### यथा- चैत्रवैशाखौ-वसन्तर्तुः

| मासौ | ऋतुः |
|---|---|
| १) ज्येष्ठाषाढौ | ........................ |
| २) श्रावणभाद्रपदौ | ........................ |
| ३) आश्वयुजकार्तिकौ | ........................ |
| ४) मार्गशिरपुष्यौ | ........................ |
| ५) माघफाल्गुणौ | ........................ |

**पदबन्धं पूरयत ।**




१) श्रीरामस्य जन्मदिनम् ।
२) एषा रात्रिः शिवस्य आराधनाय अस्ति ।
३) वर्णरञ्जितं पर्व एतत् ।
४) दीपानाम् आवलिः ।
५) इदं पर्व नवदिनपर्यन्तं प्रचलति ।
६) चैत्रमासस्य पञ्चम्यां तिथौ एतत् पर्व भवति।

@KTBS NOT TO BE REPUBLISHED

## षष्ठः पाठः

# संख्या

Q4M4S6

भाषाप्रयोगे संख्याशब्दानां स्थानं प्रमुखम्। संस्कृतभाषायां संख्याः पञ्चधा प्रयुज्यन्ते। ते संख्याप्रकाराः अत्र प्रदत्ताः।

### ०१. संख्यावाचकाः

**ये च शब्दाः संख्यां वदन्ति ते संख्यावाचकाः।**

| | |
|---|---|
| १. एकम् | १२. द्वादश |
| २. द्वे | १३. त्रयोदश |
| ३. त्रीणि | १४. चतुर्दश |
| ४. चत्वारि | १५. पञ्चदश |
| ५. पञ्च | १६. षोडश |
| ६. षट् | १७. सप्तदश |
| ७. सप्त | १८. अष्टादश |
| ८. अष्ट/अष्टौ | १९. नवदश/एकोनविंशतिः |
| ९. नव | २०. विंशतिः |
| १०. दश | २१. एकविंशतिः |
| ११. एकादश | २२. द्वाविंशतिः |

@KTBS NOT TO BE REPUBLISHED

२३. त्रयोविंशतिः
२४. चतुर्विंशतिः
२५. पञ्चविंशतिः
२६. षड्विंशतिः
२७. सप्तविंशतिः
२८. अष्टाविंशतिः
२९. नवविंशतिः/एकोनत्रिंशत्
३०. त्रिंशत्
३१. एकत्रिंशत्
३२. द्वात्रिंशत्
३३. त्रयस्त्रिंशत्
३४. चतुस्त्रिंशत्
३५. पञ्चत्रिंशत्
३६. षट्त्रिंशत्
३७. सप्तत्रिंशत्
३८. अष्टात्रिंशत्
३९. नवत्रिंशत्/एकोनचत्वारिंशत्

४०.चत्वारिंशत्
४१. एकचत्वारिंशत्
४२. द्विचत्वारिंशत्
४३. त्रिचत्वारिंशत्
४४. चतुश्चत्वारिंशत्
४५. पञ्चचत्वारिंशत्
४६. षट्चत्वारिंशत्
४७. सप्तचत्वारिंशत्
४८. अष्टचत्वारिंशत्
४९. नवचत्वारिंशत्/एकोनपञ्चाशत्
५०. पञ्चाशत्
६०. षष्ठिः
७०. सप्ततिः
८०. अशीतिः
९०. नवतिः
१००. शतम्

@KTBS
NOT TO BE REPUBLISHED

## ०२. संख्येयवाचकाः

**ये च संख्यावाचकाः कमपि वस्तुविशेषं वदन्ति ते संख्येयवाचकाः। एते त्रिषु लिङ्गेषु भवन्ति।**

| पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|
| एकः | एका | एकम् |
| द्वौ | द्वे | द्वे |
| त्रयः | तिस्रः | त्रीणी |
| चत्वारः | चतस्रः | चत्वारि |

### तदनन्तरं लिङ्ग भेदः नास्ति

| पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|
| पञ्च | पञ्च | पञ्च |
| षट् | षट् | षट् |
| सप्त | सप्त | सप्त |

### उदाहरणवाक्यानि

| | पुंलिङ्गः | स्त्रीलिङ्गः | नपुंसकलिङ्गः |
|---|---|---|---|
| ०१. | एकः बालकः अस्ति। | एका बालिका अस्ति। | एकं फलम् अस्ति |
| ०२. | द्वौ बालकौ स्तः। | द्वे बालिके स्तः। | द्वे फले स्तः। |
| ०३. | त्रयः बालाकाः सन्ति। | तिस्रः बालिकाः सन्ति। | त्रीणि फलानि सन्ति। |
| ०४. | चत्वारः बालकाः सन्ति। | चतस्रः बालिकाःसन्ति। | चत्वारि फलानि सन्ति। |

अतः परं लिङ्गभेदः नास्ति।

@KTBS NOT TO BE REPUBLISHED

## ०३. क्रमवाचकाः

- ये च शब्दाः संख्यानुसारं क्रमं वदन्ति ते क्रमवाचकाः। एतेऽपि त्रिषु लिङ्गेषु भवन्ति।

| | पुंलिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
|---|---|---|---|
| १. | प्रथमः | प्रथमा | प्रथमम् |
| २. | द्वितीयः | द्वितीया | द्वितीयम् |
| ३. | तृतीयः | तृतीया | तृतीयम् |
| ४. | चतुर्थः | चतुर्थी | चतुर्थम् |
| ५. | पञ्चमः | पञ्चमी | पञ्चमम् |
| ६. | षष्ठः | षष्ठी | षष्ठम् |
| ७. | सप्तमः | सप्तमी | सप्तमम् |
| ८. | अष्टमः | अष्टमी | अष्टमम् |
| ९. | नवमः | नवमी | नवमम् |
| १०. | दशमः | दशमी | दशमम् |
| ११. | एकादशः | एकादशी | एकादशम् |
| १२. | द्वादशः | द्वादशी | द्वादशम् |
| १३. | त्रयोदशः | त्रयोदशी | त्रयोदशम् |
| १४. | चतुर्दशः | चतुर्दशी | चतुर्दशम् |
| १५. | पञ्चदशः | पञ्चदशी | पञ्चदशम् |
| १६. | षोडशः | षोडशी | षोडशम् |
| १७. | सप्तदशः | सप्तदशी | सप्तदशम् |
| १८. | अष्टादशः | अष्टादशी | अष्टादशम् |
| १९. | नवदशः | नवदशी | नवदशम् |
| २०. | विंशतितमः | विंशतितमी | विंशतितमम् |

@KTRS NOT TO BE REPUBLISHED

## ०४. समयवाचकाः

**ये च संख्याशब्दाः समयं निर्दिशन्ति ते समयवाचकाः । उदा**

०१. पञ्चवादनम् - ५.००
०२. सपादपञ्चवादनम् - ०५.१५
०३. सार्धपञ्चवादनम् - ०५.३०
०४. पादोन षट्वादनम् - ०५-४५
०५. पञ्च-ऊन पञ्चवादनम् - ०५-५५
०६. पञ्च-अधिक-षट्वादनम् - ०५-०५
एवमेव एकवादनद्विवादनत्रिवादनादयः ज्ञातव्याः।

## ०५.परिमाणवाचकाः

**ये संख्याः वस्तुविशेषस्य परिमाणं वदन्ति ते परिमाणवाचकाः**

०१. अर्धम् = $\frac{१}{२}$ ०२. पूर्णम् = ०१

०१. पादम् = $\frac{१}{४}$ ०२. पादोनाएकम् = $\frac{३}{४}$

### क्रियाकलापः

**एतानि संख्यावाचकानि पदरूपेण लिखत।**

यथा - १५ → पञ्चदश ।

१. ४० ........................ २. ४८ ........................
३. ३५ ........................ ४. २१ ........................
५. १८ ........................ ६. ०८ ........................
७. २७ ........................ ८. ३९ ........................
९. १२ ........................ १०. ४३ ........................

@KTBS NOT TO BE REPUBLISHED

## उदाहरणानुगुणं समयम् अक्षरैः लिखन्तु ।

उदाहरणम् - ३.०० त्रिवादनम् ................

उदाहरणम् - ३.१५ सपादत्रिवादनम् ................

उदाहरणम् - ३.३० सार्धत्रिवादनम् ................

## चित्रानुगुणं समयम् अक्षरैः लिखन्तु।













@KTBS
NOT TO BE REPUBLISHED



## अभ्यासं कुरुत

प्रपरह्यः ← परह्यः ← ह्यः ← **अद्य** → श्वः → परश्वः → प्रपरश्वः

अद्य सोमवासरः

ह्यः भानुवासरः

श्वः मङ्गलवासरः

परह्यः .....

परश्वः .....

प्रपरह्यः .....

प्रपरश्वः .....

*****

@KTBS NOT TO BE REPUBLISHED

सप्तमः पाठः

# गतिस्त्वं भवानि

K6C7F6

संस्कृतभाषायां गानयोग्यानि स्तोत्राणि बहूनि सन्ति। सरला भाषा शैली च एतेषां वैशिष्ट्यम्। एतादृशानां स्तोत्राणां गायनेन चित्तशुद्धिः भगवद्भक्तिः कर्णानन्दः मनोल्लासः च लभ्यते। तेषु स्तोत्रेषु प्रसिद्धम् एकं स्तोत्राष्टकम् अत्र प्रदत्तम्।



न तातो न माता न बन्धुर्न दाता
न पुत्रो न पुत्री न भृत्यो न भर्ता ।
न जाया न विद्या न वृत्तिर्ममैव
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।१।।

भवाब्धावपारे महादुःखभीरुः
प्रपातः प्रकामी प्रलोभी प्रमत्तः।
कुसंसारपाशप्रबद्धस्सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।२।।

NOT TO BE REPUBLISHED

प्रजेशं रमेशं महेशं सुरेशं
दिनेशं निशीथेश्वरं वा कदाचित् ।
न जानामि चान्यत् सदाहं शरण्ये
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।३।।

कुकर्मी कुसङ्गी कुबुद्धिः कुदासः
कुलाचारहीनः कदाचारलीनः ।
कुदृष्टिः कुवाक्यप्रबन्धस्सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।४।।

न जानामि दानं न च ध्यानयोगं
न जानामि तन्त्रं न च स्तोत्रमन्त्रं।
न जानामि पूजां न संन्यासयोगं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।५।।

न जानामि पुण्यं न जानामि तीर्थं
न जानामि मुक्तिं लयं वा कदाचित् ।
न जानामि भक्तिं व्रतं वापि मातः
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।६।।

विवादे विषादे प्रमादे प्रवासे
जले चानले पर्वते शत्रुमध्ये ।
अरण्ये शरण्ये सदा मां प्रपाहि
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।७।।

अनाथो दरिद्रो जरारोगयुक्तो
महाखिन्नदीनस्सदाजाड्यवक्त्रः ।
विपत्तौ प्रविष्टः प्रणष्टस्सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।८।।

©KTBS NOT TO BE REPUBLISHED

## अभ्यासः

### १. रिक्तस्थानानि पूरयत ।

१. प्रपातः प्रकामी .................. प्रमत्तः ।

२. न पुत्रो न पुत्री .................. न भर्ता

३. न .................. चान्यत् सदाहं शरण्ये ।

४. न जानामि .................. व्रतं वापि मातः ।

५. गतिस्त्वं गतिस्त्वं .................. भवानि ।

### २. पर्यायपदं लिखत ।

१. अब्धिः २. निशीथेश्वरः ३. जलम् ४. अरण्यम् ५. अनलः

### ३. विरुद्धपदं लिखत ।

१. भीरुः २. प्रमत्तः ३. कुबुद्धिः ४. शत्रुः ५. विपत्तिः

### ४. स्त्रीलिङ्गरूपं लिखत ।

१. पुत्रः २. भर्ता ३. अनाथः ४. दाता

### ५. संयोजयत ।

| अ | आ |
|---|---|
| 1. पुत्रः | अ) द्वितीया विभक्ति |
| 2. सुरेशम् | आ) प्रथमा विभक्तिः |
| 3. विपत्तौ | इ) सम्बोधन प्रथमा विभक्तिः |
| 4. भवानि | ई) सप्तमी विभक्तिः |

@KTBS NOT TO BE REPUBLISHED

## ६. श्लोकानां तात्पर्यं कन्नडभाषया आङ्ग्लभाषया वा लिखत ।

१. भवाब्धावपारे महादुःखभीरुः
प्रपातः प्रकामी प्रलोभी प्रमत्तः।
कुसंसारपाशप्रबद्धस्सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।

२. कुकर्मी कुसङ्गी कुबुद्धिः कुदासः
कुलाचारहीनः कदाचारलीनः ।
कुदृष्टिः कुवाक्यप्रबन्धस्सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।

३. अनाथो दरिद्रो जरारोगयुक्तो
महाखिन्नदीनस्सदाजाड्यवक्त्रः ।
विपत्तौ प्रविष्टः प्रणष्टस्सदाहं
गतिस्त्वं गतिस्त्वं त्वमेका भवानि ।।

*****

NOT TO BE REPUBLISHED @KTBS

N6A2R3

## अष्टमः पाठः

# सन्धिः

वर्णानाम् अत्यन्तं सामीप्यं सन्धिः इत्युच्यते । सन्धौ क्वचित् वर्णव्यत्यासः वर्णलोपः वा जायते। सन्धिगतवर्णानाम् आधारेण सन्धयः त्रिधा विभक्ताः।

**सन्धिः**

स्वरसन्धिः     व्यञ्जनसन्धिः     विसर्गसन्धिः

### स्वरसन्धिः

अस्मिन् वर्षे पाठार्थं स्वरसन्धयः प्रदत्ताः । स्वरवर्णानां स्थाने जायमानः व्यत्यासः लोपो वा स्वरसन्धिः इति कथ्यते।

**स्वरसन्धिः**

सवर्णदीर्घसन्धिः     गुणसन्धिः     वृद्धिसन्धिः     यण्सन्धिः

© KTBS
NOT TO BE REPUBLISHED

०१. **सवर्णदीर्घसन्धिः :** अ, इ, उ, ऋ, एतेषां वर्णानां समानवर्णे परे दीर्घः एकादेशः भवति। एषः सवर्णदीर्घसन्धिः।

| | | | | |
|---|---|---|---|---|
| अ/आ | + | अ/आ | = | आ |
| इ/ई | + | इ/ई | = | ई |
| उ/ऊ | + | उ/ऊ | = | ऊ |
| ऋ/ॠ | + | ऋ/ॠ | = | ॠ |

उदा- बाल + अपराधः = बालापराधः

अ + अ = आ

विद्या+आलयः = विद्यालयः  मुनि+इन्द्रः = मुनीन्द्रः

गौरी+ईशः = गौरीशः  गुरु+उपदेशः = गुरूपदेशः

साधु+उवाच = साधूवाच  मातृ+ऋणम् = मातॄणम्

**०२. गुणसन्धिः** - अ. आ इत्येतयोः वर्णयोः इ/ई, उ/ऊ, ऋ/ॠ इत्येतेषु परेषु क्रमात्, ए, ओ, अर् चेति वर्णाः एकादेशा भवन्ति। एषः गुणसन्धिः।

अ/आ + 
- इ/ई=ए
- उ/ऊ=ओ
- ऋ/ॠ=अर्

उदा : देव + इन्द्रः = देवेन्द्रः

अ + इ = ए

गण+ईशः = गणेशः  सूर्य + उदयः = सूर्योदयः

चला + ऊर्मिः = चलोर्मिः  सप्त+ऋषयः = सप्तर्षयः

महा + ऋषिः = महर्षिः

**०३. वृद्धिसन्धिः -**

अ/आ इत्येतयोः वर्णयोः ए/ऐ, ओ/औ चेत्येषु वर्णेषु परेषु क्रमात् ऐ, औ वर्णौ आदेशौ भवतः एषः वृद्धिसन्धिः ।

अ/आ + 
- ए / ऐ = ऐ
- ओ+औ = औ

उदाः - एक + एकम् = एकैकम्

अ + ए = ऐ

@KTBS NOT TO BE REPUBLISHED

भाव + ऐक्यम् = भावैक्यम्  विद्या + एका = विद्यैका

दिव + ओकसः = दिवौकसः  बाला + ओष्ठः = बालौष्ठः

दिव्य + औषधम् = दिव्यौषधम्

**०४. यण् सन्धिः-**

इ/ई, उ/ऊ ऋ/ॠ, ऌ चैतेषां वर्णानां असमानवर्णे परे क्रमात् य्, व्, र्, ल् वर्णाः आदेशाः भवन्ति। एषः यण्सन्धिः।

| | | | |
|---|---|---|---|
| इ / ई | + | असमानवर्णः | =य् |
| उ/ऊ | | | =व् |
| ऋ/ॠ | | | =र् |
| ऌ | | | =ल् |

उदा - अति + अल्पः = अत्यल्पः
 इ + अ  य्

१. वाणी + एका = वाण्येका  २. मनु + अन्तरम् = मन्वन्तरम्

३. वधू + अलङ्कारः = वध्वलङ्कारः  ४. पितृ + आज्ञा =पित्राज्ञा

५. ऌ + आकृतिः = लाकृतिः

©KTBS NOT TO BE REPUBLISHED

**अवधेयांशः**

**यान्तादेशवान्तादेशसन्धिः**

ए, ऐ, ओ, औ एतेषां वर्णानां स्वरवर्णे परे अय्, आय्, अव्, आव् एते आदेशाः क्रमशः भवन्ति। अयमेव यान्तादेश - वान्तादेशसन्धिः। यथा -

ए + स्वरवर्णः = अय् → हरे + ए = हर् + आय् + ए = हरये ।

ऐ + स्वरवर्णः = आय् → नै + अकः = न्+ अय् + अकः = नायकः ।

ओ + स्वरवर्णः = अव् → विष्णो+ ए = विष्ण्+ अव् + ए = विष्णवे।

औ + स्वरवर्णः = आव् → पौ + अकः = प् + आव् + अकः= पावकः।

## पूर्वरूपसन्धिः

पदान्तस्य ए कारस्य ओ काररस्य च ह्रस्वे अकारे परे पूर्वरूपः एकादेशः भवति। अयमेव पूर्वरूपसन्धिः । यथा -

ए + अ = ए → रामे + अपि = रामेऽपि।

ओ + अ = ओ → को + अपि = कोऽपि।

* * * *

### अभ्यासः

**१. एकवाक्येन उत्तरं लिखत ।**

१. सन्धिः नाम कः ?

२. सन्धिषु कति प्रकाराः सन्ति ?

३. स्वरसन्धेः नियमः कः ?

**२. अधोलिखितानां शब्दानां सन्धिं विभज्य सन्धिनाम लिखत।**

| क्र.सं. | पदानि | सन्धिविभागः | सन्धिनाम |
|---|---|---|---|
| १. | चराचरम् | | |
| २. | भयोत्पादकाः | | |
| ३. | एकैकम् | | |
| ४. | अत्यल्पः | | |

**३. सन्धिं कृत्वा सन्धिनाम लिखत ।**

१. चला + ऊर्मिः , २. मुनि+इन्द्रः ३. विद्या+एका, ४. मनु+अन्तरम्

@KTBS NOT TO BE REPUBLISHED

**नवमः पाठः**

R5F9X2

# अतिथिदेवो भव

संस्कृतसाहित्ये शिशुकथाप्रकारे पञ्चतन्त्रं सुप्रसिद्धम्। पञ्चतन्त्रस्य रचयिता विष्णुशर्मा। महिलारोप्यनगराधिपस्य अमरशक्तेः मूर्खपुत्रान् राजतन्त्रनिपुणान् कर्तुं विष्णुशर्मा प्राणिपक्षिणः सम्भाषणरूपेण एतत् कथागुच्छं रचितवान्। अत्र पञ्चतन्त्रस्य काचित् सरला कथा प्रदत्ता। पञ्चतन्त्रस्य कथां सरलया भाषया निरूपितवान् डा. एच्. आर्. विश्वासः।

## कविकृतिपरिचयः

कविः - विष्णुशर्मा ।
कृतिः - पञ्चतन्त्रम् ।
कालः - क्रि.श. द्वितीयशतकम् ।
देशः - दक्षिणापथः ।
आश्रयदाता - महिलारोप्याधिपः अमरशक्तिः।

## पञ्चतन्त्रस्य परिचयः

अस्मिन् कथाग्रन्थे पञ्चतन्त्राणि सन्ति।

- मित्रलाभः ।
- मित्रभेदः ।
- काकोलूकीयम् ।
- लब्धप्रणाशः ।
- अपरीक्षितकारकम् ।

NOT TO BE REPUBLISHED @KTBS

कश्चन व्याधः आसीत्। सः अतीव दुष्टः निष्करुणः च। एकदा सः वनं गतवान्। तत्र जालं प्रसारितवान्। एका कपोता जाले पतिता। तां कपोतां पञ्जरे स्थापयित्वा व्याधः अग्रे गतवान्।

तदा अकस्मात् महती वृष्टिः आरब्धा। महता वेगेन वायुः अपि वाति स्म। भीतः व्याधः आश्रयम् अन्विष्यन् कस्यचित् महावृक्षस्य अधः आगतवान्। सः उक्तवान् ''भोः अत्र यः वसति तमहं शरणं गतः अस्मि। सः मां रक्षतु'' इति।

तस्मिन् वृक्षे कश्चन कपोतः वासं करोति स्म। सः एव व्याधेन गृहीतायाः कपोतायाः पतिः आसीत्। कपोतः व्याधस्य पञ्जरे स्थितां पत्नीं दृष्टवान्। तदा सा कपोता पतिम् उक्तवती ''भोः, कान्त! इदानीम् एषः व्याधः शीतार्तः क्षुधार्तः च सन् अस्माकं गृहम् आगतवान् । व्याधः मां बद्धवान् इति भवान् मा चिन्तयतु । एतस्य सत्कारं करोतु'' इति।

पत्न्याः वचनं कपोतः अङ्गीकृतवान्। सः अङ्गारकम् आनीय शुष्कैः पर्णैः अग्निं ज्वालितवान्। व्याधम् उक्तवान् ''भोः व्याध! एतेन अग्निना भवान् स्वस्य शीतबाधां दूरीकरोतु'' इति।

अनन्तरं कपोतः चिन्तयति ''एषः व्याधः मम अतिथिः अस्ति। एषः इदानीं बुभुक्षितः । एतस्मै दातुं कोऽपि आहारः अत्र नास्ति। किं करोमि?'' इति।

एवं चिन्तयित्वा सः व्याधम् उक्तवान्। ''भोः अतिथिमहाशय ! भवान् एकं क्षणं तिष्ठतु। इदानीं भवते आहारं सिद्धं कृत्वा ददामि । मम मांसम् एव खादतु '' इति उक्त्वा स्वयं अग्निं प्रविष्टवान्।

कपोतस्य त्यागं दृष्ट्वा व्याधस्य लज्जा जाता। सः करुणया कपोतां पञ्जरतः बन्धविमुक्तां कृतवान्। तदा पतिविरहपीडिता सा कपोता अपि अग्निं प्रविष्टवती।

©KTBS NOT TO BE REPUBLISHED



एतत् दृष्ट्वा व्याधस्य मनसः परिवर्तनं जातम्। ''एतादृशाः पक्षिणः अपि धर्माचरणं कुर्वन्ति। अहं तु अन्येषां प्राणिनां प्राणानामपहरणं कुर्वन् अधर्मेण जीवामि। एतत् अनुचितम्'' इति चिन्तितवान्।

एवं सः व्याधः क्रूरकर्माणि परित्यक्तवान्। तदारभ्य सः व्याधः शेषं जीवितम् आनन्देन अहिंसया च यापितवान्।

*****

Not to be republished @KTBS

## शब्दार्थाः

**व्याधः** = किरातः, **शबरः** = लुब्धकः, **निष्करुणः** = क्रूरी, **वनम्** = काननम्, विपिनम्, **कपोतः** = पारावतः, **वृष्टिः** = वर्षम्, **पतिः** = भर्ता, **पत्नी** = भार्या, सती, जाया, **क्षुत्** = बुभुक्षा, **पर्णम्** = पत्रम्, **अग्निः** = अनलः, वह्निः, **लज्जा** = व्रीडा, **परिवर्तनम्** = परिदानम्

## अभ्यासः

### १. एकवाक्येन उत्तरं लिखत ।

१. व्याधः कीदृशः आसीत् ?

२. व्याधः कपोतां कुत्र स्थापितवान् ?

३. कपोतः किम् आनीय अग्निं ज्वालितवान् ?

४. व्याधः कस्य अतिथिः ?

६. कपोतयोः मरणं दृष्ट्वा व्याधः किं कृतवान् ?

### २. मञ्जूषातः समानार्थकपदानि चित्वा लिखत।

(शबरः, वृष्टिः, वातः, पर्णम्, अग्निः)

१. वायुः = ..................................

२. पत्रम् = ..................................

३. व्याधः = ..................................

४. अनलः = ..................................

५. वर्षा = ..................................

NOT TO BE REPUBLISHED @KTBS

## ३. एतेषां शब्दानां इतररुपाणि लिखत ।

| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| व्याधः | व्याधौ | व्याधाः |
| कपोता | | |
| पर्णम् | | |
| जाले | | |
| अधर्मेण | | |

## ४. यथानिर्देशं लिखत ।

१. एतस्य सत्कारं करोतु।

क: पाठः ? का वदति ? कं वदति ?

२. एषः व्याधः मम अतिथिः अस्ति।

कः पाठः ? कः वदति? कस्य अतिथिः व्याधः?

३. एतादृशाः पक्षिणः अपि धर्माचरणं कुर्वन्ति।

कः पाठः ? कः एवं चिन्तयति? के धर्माचरणं कुर्वन्ति?

## ५. घटनानुक्रमेण लिखत ।

१. कपोतः पञ्जरे स्थितां पत्नीं दृष्टवान् ।

२. अनन्तरं कपोतः स्वयम् अग्निं प्रविष्टवान् ।

३. व्याधः जालं प्रसारितवान् ।

४. कपोता अपि अग्निं प्रविष्टवती ।

५. व्याधस्य मनसः परिवर्तनं जातम् ।

६. एका कपोता जाले पतिता ।

NOT TO BE REPUBLISHED @KTBS

**६. दशभिः वाक्यैः उत्तरं कर्णाटकभाषया आङ्ग्लभाषया वा लिखत।**

१. कपोतस्य अतिथिसत्कारं विवृणुत।

******

## क्रियाकलापः

**कोष्टकस्य साहाय्येन दशवाक्यनि रचयत।**

उदाहरणम् - सः चतुरः आसीत् ।

| | | |
|---|---|---|
| सः<br>व्याधः | निष्करुणः<br>शीतार्तः<br>क्षुधार्तः<br>दुष्टः<br>भीतः | आसीत् |

१)

२)

३)

४)

५)

६)

७)

८)

९)

१०)

@KTBS
NOT TO BE REPUBLISHED

दशमः पाठः

# उपसर्गाः अव्ययानि च

N3X4B9

भाषाप्रयोगज्ञानाय भाषाघटकज्ञानम् अत्यावश्यकम्। उपसर्गाः अव्ययानि च संस्कृतभाषाघटकेषु प्रधानतया अन्तर्भवन्ति। एतेषां उपयोगेन भाषाप्रयोगः सुगमः भवति। अतः अत्र उपसर्गाणाम् अव्ययानां च परिचयः प्रदत्तः।

## उपसर्गाः

क्रियापदानाम् आदौ तैः सहैव प्रयुज्यमानाः शब्दाः उपसर्गाः इत्युच्यन्ते। ते च उपसर्गाः द्वाविशंतिः (२२) सन्ति । यथा-

© KTBS NOT TO BE REPUBLISHED

**उपसर्गाः - २२**

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| ०१. | प्र | ०७. | निस् | १३. | नि | १९. | अभि |
| ०२. | परा | ०८. | निर् | १४. | अधि | २०. | प्रति |
| ०३. | अप | ०९. | दुस् | १५. | अपि | २१. | परि |
| ०४. | सम् | १०. | दुर् | १६. | अति | २२. | उप |
| ०५. | अनु | ११. | वि | १७. | सु | | |
| ०६. | अव | १२. | आङ् | १८. | उत् | | |

### उपसर्गगतिः

**धात्वर्थं बाधते कश्चित्  कश्चित् तमनुवर्तते।**
**तमेव विशिनष्ट्यन्यः उपसर्गगतिस्त्रिधा ।।**

उपसर्गेण क्रियापदस्य अर्थः क्वचित् तथैव तिष्ठति क्वचित् स्वल्पतया परिवर्तते क्वचित् पूर्णतया परिवर्तते।

## ०१. क्रियापदार्थपरिवर्तकाः

| क्रियापदम् | उपसर्गः | क्रियापदरूपम् |
|---|---|---|
| गच्छति | उत् | उद्गच्छति |
| हरति | सम् | संहरति |
| नयति | अप | अपनयति |
| अस्यति | निर् | निरस्यति |
| भवति | परा | पराभवति |
| भजति | वि | विभजति |

## ०२. क्रियापदार्थपोषकाः

| क्रियापदम् | उपसर्गः | क्रियापदरूपम् |
|---|---|---|
| धावति | प्र | प्रधावति |
| शाम्यति | उप | उपशाम्यति |
| वर्धते | सं | संवर्धते |
| नयति | सु | सुनयति |
| पश्यति | प्र | प्रपश्यति |

## ०३. क्रियापदार्थविरोधकाः

| क्रियापदम् | उपसर्गः | क्रियापदरूपम् |
|---|---|---|
| गच्छति | आङ् | आगच्छति |
| नयति | आङ् | आनयति |
| याति | अङ् | आयाति |
| ददाति | आङ् | आददाति |

NOT TO BE REPUBLISHED @KTBS

# अव्ययानि

नामपदेषु अव्ययानि अपि अन्यतमानि। किन्तु सर्वलिङ्गविभक्तिवचनेषु एतेषां रूपाणि समानानि। तदुक्तम् -

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।**

**वचनेषु च सर्वेषु यन्नव्येति तदव्ययम् ।।**

**अव्ययानि**

सामान्याव्ययानि  कृदन्ताव्ययानि  तद्धितान्ताव्ययानि

अस्मिन् वर्षे सामान्याव्ययानि पाठार्थं दत्तानि।

सामान्याव्ययानि :- संस्कृतभाषाप्रयोगे विविधार्थेषु बहूनि अव्ययानि उपयुज्यन्ते। एतानि विना भाषाप्रयोगः दुष्करः । प्रसिद्धानि इमानि -

च, एव, एवं, अपि, इति, अथ, किन्तु, अथवा, उत, तु, खलु, सुष्ठु, आहोस्वित्, परं, सकृत्, उच्चैः, नीचैः, अधः, उपरि, सम्यक्, उभयतः, सर्वतः -

@KTBS NOT TO BE REPUBLISHED

एतेषु केषाञ्चन प्रयोगः अत्र प्रदत्तः।

| अव्ययम् | उदाहरणवाक्यम् |
|---|---|
| च | रामः कृष्णः च पठति। |
| अपि | गणेशः उत्तमः। रमेशः अपि उत्तमः। |
| उच्चैः | गीता उच्चैः गायति। |
| अधः | वृक्षस्य अधः मूलमस्ति। |
| उपरि | पर्वतस्य उपरि देवालयः अस्ति। |
| सम्यक् | अध्यापकः सम्यक् पाठयति। |
| सकृत् | सर्वेऽपि जीवने सकृत् संस्कृतं पठन्तु। |
| सुष्ठु | सचिनः सुष्ठु क्रीडति। |
| एव | रामः एव शूरः। |
| खलु | संस्कृतं सुन्दरं खलु। |

@KTBS NOT TO BE REPUBLISHED

**अत्र कानिचन सामान्याव्ययानि प्रदत्तानि**

च (and, ಮತ್ತು), इति (thus, ಎಂದು), सकृत् (once, ಒಮ್ಮೆ), उच्चैः (Loudly, ಜೋರಾಗಿ), उपरि (top, ಮೇಲೆ), अधुना (now, ಈಗ), अधः (down, ಕೆಳಗೆ)

## अभ्यासः

### उचितेन अव्ययेन रिक्तस्थानं पूरयत।

१. शिवस्य मस्तकस्य .................................. गंगा विराजते।

२. रामः लक्ष्मणः सीता ....................... अयोध्याम् आगच्छन्।

३. शिशुः ............................................. रोदनम् अकरोत्।

४. अहं शालां गच्छामि .................. पुत्री जननीम् अवदत्।

५. अहं ................................................. आपणं गच्छामि।

६. देवदत्तः प्रतिदिनं .................................. भोजनं करोति।

७. उत्पीठिकायाः .......................... बिडालः उपविष्टः अस्ति।

@KTBS
NOT TO BE REPUBLISHED

एकादशः पाठः

# पत्राणि

## विरामपत्रम्

सकाशात् -

..................

राष्ट्रियप्रौढशाला,

निट्टूरु ।

सविधे -

..................

राष्ट्रियप्रौढशाला,

निट्टूरु ।

मान्याः,

विषयः - विरामाय प्रार्थना

अहं...............निमित्तं.................विरामम् इच्छामि। अतः कृपया ददतु इति प्रार्थये।

वन्दनानि

स्थलम् : भवतः छात्रः। छात्रा

दिनाङ्कः

| सविधे | निमित्तानि | दिनानि |
|---|---|---|
| वर्गोपाध्यायः | अनारोग्यनिमित्तम् | एकं दिनम् |
| कक्ष्योपाध्यायः | ग्रामगमननिमित्तम् | दिनद्वयम् |
| मुख्योपाध्यायः | देवदर्शननिमित्तम् | दिनत्रयम् |
| | उत्सवनिमित्तम् | दिनचतुष्टयम् |
| | पर्वनिमित्तम् | दिनपञ्चकम् |

**पत्रे रिक्तस्थानेषु मञ्जूषस्थानि पदानि यथोचितम् उपयोज्यानि।**

@KTBS NOT TO BE REPUBLISHED

# मित्रं प्रति पत्रम्

।। श्रीः ।।

क्षेमम् मैसूरु

१४-१०-२०१८

प्रिय मित्र! नमस्ते ।

अत्राहं कुशली/कुशलिनी । त्वमपि कुशली / कुशलिनीति भावयामि । अस्माकं शालायाः वार्षिकोत्सवः २०-११-२०१८ दिने प्रचलिष्यति। तदा सांस्कृतिककार्यक्रमाः भविष्यन्ति। तस्मिन् कार्यक्रमे अहमपि भागं वहामि। भवान्/भवती अपि कार्यक्रमार्थम् अवश्यम् आगच्छतु । अन्यः विशेषः नास्ति। पत्रं लिखतु ।

इति भवदीय/या प्रियसखः/सखी

परमेशः/पवित्रा

पत्रसङ्केतः

सकाशात्,

______________

______________

______________

सविधे,

______________

______________

______________

*****

@KTBS NOT TO BE REPUBLISHED

द्वादशः पाठः

# अनुवादः

B7K5N1

ಈ ಕೆಳಗಿನ ವಾಕ್ಯಗಳನ್ನು ಸಂಸ್ಕೃತ ಭಾಷೆಗೆ ಅನುವಾದಿಸಿರಿ.

Translate the following Sentences into Samskrit.

1. ಹಸುವು ಪೂಜನೀಯವಾಗಿದೆ.ಅದು ನಮಗೆ ಹಾಲನ್ನು ಕೊಡುತ್ತದೆ. ತಾಯಿಯಂತೆ ನಮ್ಮನ್ನು ಪಾಲಿಸುತ್ತದೆ.

   The Cow is a sacred animal. It gives milk to us. It protects us like a mother.

2. ನನ್ನ ಪುಸ್ತಕದ ಹೆಸರು "ಸಂಸ್ಕೃತ ರಶ್ಮಿ". ಇದರಲ್ಲಿ ಒಳ್ಳೆಯ ಕಥೆಗಳಿವೆ. ಮಧುರವಾದ ಪದ್ಯಗಳೂ ಇವೆ.

   The name of my book is 'Samskrita Rashmi'. It contains very good stories and lovely poems also.

3. ದೀಪಾವಳಿ ಹಬ್ಬವನ್ನು ಆಶ್ವಯುಜಮಾಸದಲ್ಲಿ ಆಚರಿಸಲಾಗುತ್ತದೆ. ಬಾಲಕ ಬಾಲಕಿಯರು ನೂತನವಸ್ತ್ರಗಳನ್ನು ಧರಿಸುತ್ತಾರೆ.

   Deepavali festival is celabrated in Aashwayuja month. Boys and girls wear new clothes.

4. ಸಂಸ್ಕೃತ ಭಾಷೆಯು ಅತ್ಯಂತ ಸರಳವೂ, ಸುಲಭವೂ ಮತ್ತು ಮಧುರವೂ ಆಗಿದೆ. ನಾವೆಲ್ಲರೂ ಈ ಭಾಷೆಯನ್ನು ಕಲಿತು ಅಭ್ಯಸಿಸೋಣ.

   Samskrit is very simple, easy and pleasant language. Let us learn and practise this language.

©KTBS NOT TO BE REPUBLISHED

ಈ ಕೆಳಗಿನ ವಾಕ್ಯಗಳನ್ನು ಕನ್ನಡ ಅಥವಾ ಆಂಗ್ಲಭಾಷೆಗೆ ಅನುವಾದಿಸಿರಿ.

Translate the following Sentences into Kannada or English

१. सर्वेषु धनेषु विद्याधनम् एव उत्तमं धनम् इति मन्यते। विद्या एव अस्मान् सन्मार्गे स्थापयति।

२. वसन्तः ऋतूनां राजा अस्ति। अस्मिन् एव ऋतौ युगारम्भः भवति। सर्वत्र वृक्षाः लताश्च पुष्पिताः भवन्ति। प्रकृतिः अत्यन्तमनोहारिणी भवति।

३. भोः छात्राः! मातापितरौ गुरुं च नमत। सत्प्रजाः भूत्वा भारतस्य अभिवृद्धये प्रयत्नशीलाः भवत।

४. अस्माकं शालायाः छात्राः मृगालयं द्रष्टुं मैसूरु नगरम् अगच्छन्। ते तत्र गजान्, व्याघ्रान्, भल्लूकान्, मयूरान्, सर्पान्, हंसान् च अपश्यन्।

*****

## संस्कृतभाषासम्बन्धीनि जालस्थानानि

- ➪ www.jnu.ac.in
- ➪ www.sanskritjagat.com
- ➪ http://www.speaksanskrit.org
- ➪ http://sudharma.epapertoday.com
- ➪ http://www.sanskritvartmanpatram.com
- ➪ http://www.bookbox.com
- ➪ http://www.sambhashanasandesha.in
- ➪ http://www.spokensanskrit.de
- ➪ http://www.sanskrit.safire.com

*****

© KTBS NOT TO BE REPUBLISHED

# पूरकपाठः - १

## महर्षिः पाणिनिः



@KTBS
NOT TO BE REPUBLISHED

आसीत् हिमालयसानौ एकं गुरुकुलम् । तस्मिन् वर्षोपाध्यायः नाम आचार्यः आसीत् । वररुच्यादयः बुद्धिमन्तः छात्राः तत्र अभ्यस्यन्ति स्म । तेषु शिष्येषु कश्चित् जडबुद्धिरपि आसीत् । एतम् अन्ये छात्राः तदा तदा अपहसन्ति स्म। एतेन सावमानः एषः नितरां खिन्नः ।

अतः विद्यया एव यशः गौरवञ्च इति विनिश्चित्य सः विद्याकामः तुहिनाचलम् अगच्छत् । तत्र निश्चलमनसा अतपत्। तपसा सन्तुष्टः शिवः कैलासे स्वढक्कां वादयन् अनृत्यत् । ढक्कानिर्गतो मङ्गलमयो नादः एतस्य ज्ञानोद्बोधकः अभवत् । वर्णजालाभिव्यञ्जकोऽयं नादः व्याकरणसूत्रग्रथने कारणमभवत् ।

तदनु सोऽयं छात्रः प्रख्यातः वैय्याकरणः अभवत् । सः एव अष्टाध्यायीप्रणेता पाणिनिः। पणिन् इति गोत्रे उत्पन्नः इति कारणात् पाणिनिः इति तस्य नाम अभवत् । आहीकः इति पाणिनेः मूलं नामधेयम् । तस्य माता दाक्षी पिता शलङ्खुः । तस्य ग्रामः शलातुरः । सः क्रिस्ताब्दात् प्राक् चतुर्थशतके आसीत् ।

पाणिनिना विरचितस्य अष्टाध्यायीनामकस्य व्याकरणसूत्रग्रन्थस्य मूलानि माहेश्वराणि सूत्राणि । एतानि महेश्वरात् आगतानि इत्यतः माहेश्वराणि सूत्राणि इति ज्ञातानि । अष्टाध्याय्याम् अष्टौ अध्यायाः सन्ति । प्रत्यध्यायं चत्वारः पादाः सन्ति । प्रत्येकमपि पादे बहूनि सूत्राणि वर्तन्ते । आहत्य उपचतुस्सहस्रसूत्राणि विलसन्ति । ईश्वरानुग्रहेण व्याकरणग्रन्थं प्रणीतवन्तं पाणिनिमेवं स्मरति लोकः।

@KTBS NOT TO BE REPUBLISHED

**येनाक्षरसमाम्नायम् अधिगम्य महेश्वरात् ।**
**कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ।।**

**नृत्तावसाने नटराजराजो ननाद ढक्कां नवपञ्चवारम् ।**
**उद्धर्तुकामस्सनकादिसिद्धानेतद्विमर्शे शिवसूत्रजालम् ।।**

## स्वाधिगमपरीक्षणं स्वतः कुरुत

१.पाणिनेः गुरुकुलं कुत्र आसीत् ? ....................................

२.पाणिनेः गुरुकुलस्य आचार्यः कः ? ................................

३.शिवः कुत्र अनृत्यत् ? ............................................

४.पाणिनिप्रणीतः ग्रन्थः कः ? .........................................

@KTBS
NOT TO BE REPUBLISHED

# पदकोषः

| | | |
|---|---|---|
| अङ्गारः | ಕೆಂಡ | Charcoal |
| अपदः | ಕಾಲಿಲ್ಲದ | feet less |
| अर्बुदरोगः | ಅರ್ಬುದರೋಗ | Cancer |
| अभ्यासः | ರೂಢಿ | practice, exercise |
| अमुखः | ಬಾಯಿಲ್ಲದ | mouthless |
| असहिष्णुता | ಅಸಹನೆ | intolerance |
| अहिंसा | ಅಹಿಂಸೆ | non-injury |
| अवगम्यते | ತಿಳಿಯಲ್ಪಡುತ್ತದೆ | being known |
| आत्मवत् एव | ತನ್ನಂತೆಯೇ | like oneself |
| आक्रान्तम् | ಆವರಿಸಲ್ಪಟ್ಟಿತ್ತು | filled |
| आविष्काराः | ಹೊಸದಾಗಿ ಕಂಡುಹಿಡಿದ | inventions |
| आसन्दः | ಆಸನ | chair |
| आहर | ತೆಗೆದುಕೊಂಡುಬಾ | bring |
| इन्द्रियनिग्रहः | ಇಂದ್ರಿಯಗಳ ನಿಯಂತ್ರಣ | control of sencess |
| उक्तिः | ಮಾತು, ವಚನ | saying, statement |
| ऊर्मिः | ಅಲೆ, ತರಂಗ, | wave |
| ऊर्मिका | ಉಂಗುರ | finger-ring |
| कटु | ಒರಟು, ಖಾರ | harsh, hot |
| कामधुक् | ದೇವಹಸು, ಕಾಮಧೇನು | divine cow, |
| किरातः | ಬೇಟೆಗಾರ | hunter |
| कुल्याः | ಕಾಲುವೆಯ | of a canal |
| कृषीवलः | ರೈತ | farmer |
| कियत् | ಎಷ್ಟು | how much |
| चक्रयुक्तः आसन्दः | ಗಾಲಿಕುರ್ಚಿ | wheel chair |
| चिकित्सकः | ವೈದ್ಯ | doctor |
| जिह्वा | ನಾಲಿಗೆ | tongue |
| जेत्री | ಗೆದ್ದವಳು | victorious (f) |

NOT TO BE REPUBLISHED ©KTBS

| | | |
|---|---|---|
| दमः | ಸಂಯಮ | control of the mind |
| दया | ಕರುಣೆ | compassion |
| द्विजिह्वा | ಎರಡು ನಾಲಿಗೆಯುಳ್ಳ | two tongued |
| ध्वनिपेटिका | ಧ್ವನಿ ಪೆಟ್ಟಿಗೆ | sound box |
| निःशुल्कम् | ಶುಲ್ಕವಿಲ್ಲದೆ | without fee |
| निःशुल्कम् | ಉಚಿತವಾಗಿ | ree of cost |
| पथिकः | ದಾರಿಹೋಕ | traveller |
| परः | ವೈರಿ, ದೂರ, ಅನ್ಯ | enemy, far, other |
| पृष्ठरज्जुः | ಬೆನ್ನುಹುರಿ | Spinal cord |
| प्रकोष्ठः | ಕೋಣೆ | room |
| प्रचोदिता | ಪ್ರಚೋದಿಸಲ್ಪಟ್ಟ | motivated |
| प्रहर | ಹೊಡಿ | beat |
| परिपाल्य | ಪರಿಪಾಲಿಸಿ | having followed |
| भित्त्वा | ಸಿಗಿದು, ಕತ್ತರಿಸಿ | having slit |
| मार्जारी | ಹೆಣ್ಣುಬೆಕ್ಕು | female cat |
| मातुलः | ಸೋದರಮಾವ | maternal uncle |
| मित्रता | ಗೆಳೆತನ | friendship |
| योगदानम् | ಕೊಡುಗೆ | contribution |
| रूप्यकम् | ರುಪಾಯಿ | rupee |
| लज्जा | ನಾಚಿಕೆ | sense of shame |
| लोभः | ದುರಾಸೆ | greed |
| वचः | ಮಾತು | speech |
| वत्सः | ಮಗು, ಕರು | child, calf |
| वर्तुलाकारम् | ಗೋಳಾಕಾರ | circular |
| वैरूप्यम् | ವಿರೂಪತೆ | disfigurement |
| विक्रेतुम् | ಮಾರಲು | to sell |
| वह्निः | ಬೆಂಕಿ | fire |
| वाताटः | ಗಾಳಿಪಟ | kite |
| वित्तम् | ಹಣ, ಧನ | wealth |

NOT TO BE REPUBLISHED ©KTBS

| | | |
|---|---|---|
| विपणिः | ಅಂಗಡಿ | shop |
| शीतः | ತಂಪು | cool |
| शुष्कः | ಒಣಗಿದ | dried |
| शोकम् | ಶೋಕಿಸುವುದು | feel sad |
| शोभा | ಕಾಂತಿ, ಕಳೆ | splendour |
| शल्यचिकित्सा | ಶಸ್ತ್ರಚಿಕಿತ್ಸೆ | surgery |
| श्लाघनीयम् | ಪ್ರಶಂಸಾರ್ಹ | praiseworthy |
| सौनिकः | ಕಟುಕ | butcher |
| सर्पिणी | **ಹೆಣ್ಣುಹಾವು** | female snake |
| सम्भूय | ಒಟ್ಟಿಗೆ ಸೇರಿ | having united |
| स्यूतः | ಚೀಲ | bag |
| स्रुतम् | ಸೋರಿದ, ಸುರಿದ | Oozing, exuding |
| सहवासः | ಸಹವಾಸ | company |
| संहर | ಕೊಲ್ಲು | kill |
| समृद्धः | ಸಮೃದ್ಧವಾದ | prosperous |
| हिंस्रम् | ಕ್ರೂರ | cruel |
| क्षुधा | ಹಸಿವು | hunger |
| श्रान्तः | ಆಯಾಸಗೊಂಡ | exhausted |

NOT TO BE REPUBLISHED ©KTBS

# आकरग्रन्थाः

१. डा. विश्वासः - पञ्चतन्त्रकथाः, संस्कृतभारती, बेङ्गलूरु अष्टमं मुद्रणम्-२०१०, ISBN 978-81, 88220-22-1, पुट ७२-७७.

२. च.मू. कृष्णशास्त्री - परिवर्तनम्, संस्कृतभारती, बेङ्गलूरु, प्रथम मुद्रणम् २००३. ISBN 81-88220 - 44 - 2 पुट ३२-३४.

३. जि. महाबलेश्वरभट्टः - सन्धिः समासः । संस्कृतभारती बेङ्गलूरु -२०१० ISBN 978-81-88220-19-1

1. ದುರ್ಗಸಿಂಹ ಪಂಚತಂತ್ರಮ್

2. ವಿದ್ವಾನ್ ಎನ್. ರಂಗನಾಥ ಶರ್ಮ ಅಮರಸಿಂಹನ 'ನಾಮಲಿಂಗಾನು ಶಾಸನಮ್' ಅಥವಾ ಅಮರಕೋಶ, ಕಾವ್ಯಾಲಯ, ಪ್ರಕಾಶಕರು, ಜಯನಗರ, ಮೈಸೂರು, ಮೊದಲ ಮುದ್ರಣ 1975.

1. Timmannachar G.K., Kalidasa's Abhijanana Shakuntalam, Bangalore Press, Bangalore, 1935.

2. Pride of India, Samskrit Bharathi, New Delhi 2006 ISBN 81-87276-27-4.

3. APTE V.S. Samskrit - English Dictonary, Motilal Banarasidas, New Delhi.

©KTBS NOT TO BE REPUBLISHED